संस्कृत–त्रैमासिकी

ISSN : 2278-3741
अङ्काः १ – ४
वर्षः ४१

# अजस्रा

अखिल-भारतीय-संस्कृत-परिषद्
लखनऊ

# नियमाः

१– अजस्रानाम्नीयं त्रैमासिकी संस्कृतपत्रिका मकर–मेष–कर्क– तुला–सङ्क्रान्तिषु (जनवरी–अप्रैल–जुलाई–अक्तूबरमासेषु) प्रकाशिता भवति।

२– अस्याः पत्रिकाया उद्देश्यं संस्कृतसम्पदां संरक्षणम्, विभिन्नपद्धतिजुषां रचनानां संवर्धनम्, प्रातिभनूतनकृतीनां संसर्जनञ्च।

३– समालोचनाभिलाषुकैः प्रकाशकैर्लेखककैर्वा नवीनकृतीनां द्वयी प्रेषणीया।

४– पत्रिकायामस्यां कवितालेखकथानाटकादीनि शोधनिबन्धाश्च स्थानं प्राप्स्यन्ति।

५– प्रकाशनाय प्रेषिताः सर्वविधा रचना एकस्मिन् पत्रपृष्ठे सुस्पष्टाक्षरै–र्लिखिताः टङ्किता वा स्युः।

६– कृतीनां प्रकाशनस्य सम्पादनस्य च सर्वाधिकारः सम्पादके संरक्षितोऽस्ति।

७– अस्वीकृता लेखाः टिकटसहितपत्रपुटके लब्धे सति लेखकेभ्यः प्रत्यावर्तिष्यन्ते।

८– लेखकेभ्यस्तल्लेखानां दशसङ्ख्याका उन्मुद्रितयः प्रदास्यन्ते।

संस्कृत-त्रैमासिकी

ISSN-2278-3741

# अजस्रा

अङ्काः १ – ४

वर्षः ४१

**अखिल–भारतीय–संस्कृत–परिषद्**

देववाणी–भवनम्, अलीगञ्जम्,

लखनऊ–२२६ ०२४

**शुल्कम्**

| | | | |
|---|---|---|---|
| वार्षिकम् | २४०.०० | रूप्यकाणि | $ २५.०० |
| एकस्याऽङ्कस्य | ६०.०० | रूप्यकाणि | $ १०.०० |
| आजीवनम् | २१००.०० | रूप्यकाणि | $ २१०.०० |

**प्राज्ञपरिषत्**

प्रो० राधावल्लभ–त्रिपाठी

प्रो० राजेन्द्र–मिश्र

**प्रधान–सम्पादकः**

**प्रो० अशोककुमारकालिया**

**सम्पादक :**

**प्रो० बृजेशकुमारशुक्लः**

---

अखिल भारतीय संस्कृत–परिषद्, देववाणी–भवनम्, अलीगञ्ज, लखनऊ की ओर से श्री जितेन्द्र कुमार त्रिपाठी द्वारा प्रकाशित और प्रो० बृजेशकुमार शुक्ल द्वारा सम्पादित तथा श्री मनीष मेहता द्वारा प्नार आफसेट, 17 अशोक मार्ग, हजरतगञ्ज, लखनऊ से मुद्रित।

# अनुक्रमः


| | | | | |
|---|---|---|---|---|
| ● | सम्पादकीयम् | | | ४ |
| १. | असभ्यता चत्वारिंशिका | – | प्रो० रहसबिहारी द्विवेदी | ५ |
| २. | प्रो० बृजेशकुमारशुक्लप्रणीतमभिनव–काव्यशास्त्रम् | – | प्रो० बृजेशकुमारशुक्लः | ११ |
| ३. | वैदिकं देवरहस्यम् | – | डॉ० मितालीदेवः | १६ |
| ४. | भासकर्णः | – | डॉ० श्रुतिकीर्तिः | २५ |
| ५. | न काश्मीरेषु त्रैवर्णध्वजोत्पवने वयं शक्ताः | – | प्रो० ओम्प्रकाशपाण्डेयः | २८ |
| ६. | वाच्यालङ्काराणां गुणीभूतव्यङ्ग्यत्वम् | – | डॉ० ममता गुप्ता | ३२ |
| ७. | विश्ववन्धुत्वम् | – | डॉ० उदयकुमारझा | ३७ |
| ८. | गङ्गाया धर्मशास्त्रीयं विवेचनं वैज्ञानिकत्वञ्च | – | प्रो० रामसुमेरयादवः | ४१ |
| ९. | मनो रीत्या राजकर्तव्यता | – | डॉ० अभिमन्युसिंहः | ५१ |
| १०. | गुरुतत्त्वञ्च धीमहि | – | डॉ० प्रयागनारायणमिश्रः | ५५ |
| ११. | अयनांशविचारः | – | डॉ० अनिलकुमारपोरवालः | ६४ |
| १२. | अभिनवगुप्तस्य रससिद्धान्तः | – | पूर्णेन्दुप्रतापसिंहः | ७० |
| १३. | उपनिषत्सु कठोपनिषदः स्थानम् | – | डॉ० श्रीमती ज्योतिकुमारी | ७७ |

# सम्पादकीयम्

अस्त्यस्माकं भारतीयसमाजे सुरगवीसम्मानत्वं नितराम्। प्रवर्तमानं केन्द्रशासनमुत राज्यप्रशासनमभेऽपि संस्कृतस्य प्रचारप्रसारार्थं सोत्साहं प्रयतमाने स्तः किन्तु ताभ्या यादृशं सुष्ठु कार्यं देववाण्याः हितैकदृष्ट्याऽनुष्ठितं तदननुकूलसामाजिकपरिस्थितावपर्याप्तमेव प्रतिभाति। यतो हि संस्कृतकार्यव्यापृतपूरुषत्वेन प्रायशस्त एव जनाः सनाथीकृताः ये खलु प्रयत्नशीला अपि शास्त्रेषु श्रद्धाबुद्ध्यभावाद् अपेक्षितदृष्ट्यभावाच्च न सार्थकं किमपि कर्तुं पारयन्ति। जनमतमेव लोकतन्त्रस्याऽऽत्मतत्त्वम्। जनमतनिर्णयस्तु निर्वाचनाधीनो भवति। अतो निर्वाचनमेव मनसि निधाय सर्व शासनं प्रशासनं वा प्रचलति। किन्तु संस्कृतस्य हितं मतसङ्ग्राहकजनसम्मर्दं नाऽपेक्षते। एतदर्थं यथार्थसुरगवीर–समुपासकाः शास्त्रश्रद्धालवः पारम्परिकदेवभाषाज्ञान–संसाधकाः निःस्वार्थसंस्कृतसेवकाश्च जना अन्वेष्टव्या भवन्ति।

व्यवहारर्थमेव संस्कृताऽध्ययनं किं वा कस्य वोपकरोतीत्यवश्यं विचारणीयम्। यतो हि संस्कृताऽध्ययनं विनाऽपि व्यवहारस्तु प्रचलत्येव। अतोऽस्माकं त्विदमेव मन्तव्यमस्ति यद् भारतीय–संस्कृति–संरक्षणम्, संस्कृतभाषा–निबद्धशास्त्रसरंक्षणञ्चाऽस्माकं प्राथमिकमुद्देश्यमस्ति। उद्देश्यं चेदं संस्कृतज्ञानाऽधीनम्। अतः संस्कृत्यभिज्ञानं शास्त्रज्ञानञ्चोद्दिश्य संस्कृतमध्येयम्, न केवलं व्यवहारमुद्दिश्य।

अङ्कोऽ विलम्बेन प्रकाशमुपयाति। एतदर्थं क्षमाकाङ्क्षी खलु सम्पादकः। अपेक्षिता लेखा विदुषां नायान्ति। ये लेखास्तावदायान्ति ते न प्रौढ़ाः, सन्धिसमासव्याकरणादिविषयगाम्भीर्यं च नाऽऽवहन्ति सुष्ठु। एतेषां लेखानाम्, शोधपत्राणाम्, कवितानाञ्च प्रकाशनाय सम्पादकेन पर्याप्तानि संशोधनानि परिमार्जनानि चाऽपेक्षितानि भवन्ति। अनेनाऽपि कार्यं विलम्बितं भवति। अजस्राया एतप्रकाशनं विपश्चिद्भिरङ्गीकरणीयम्। यद्यपि भाषासाधुत्वं प्रति प्रयासः सम्पादकेन भृशं विहितस्तथापि 'हसन्ति दुर्जनास्तत्र समादधति सज्जनाः' इति रीत्या सुधियः समाधानं कुर्वन्त्विति शम्।।

**प्रो० रहसबिहारी द्विवेदी**
जबलपुरम्

## असभ्यता चत्वारिंशिका

### भारतासभ्यताऽहर्निशं वर्धते

पाति योऽसौ पिता भारते कथ्यते
किन्तु तस्मै 'हलो डेड' सम्बोध्यते।
मान्यते या सुमाता 'ममी' कथ्यते
भारतासभ्यताऽहर्निशं वर्धते।।१।।

प्रीतिभोजेऽतिथीनां करो दूषितो
वाहनादेः प्रदुष्टो मुदा मिश्र्यते।
दूषितेनैव हस्तेन सम्भुज्यते
भारतासभ्यताऽहर्निशं वर्धते ।।२।।

प्रीतिभोजे च 'डी.जे.' ध्वनौ श्रूयते
नो चलद्वाग्ध्वनिः स्वं गृहं दह्यते।
त्यक्तकालाच्च पत्न्या शिरो धूयते
भारतासभ्यताऽहर्निशं वर्धते ।।३।।

श्रूयते प्रायशो ये हृदो रोगिणः
ते हि 'डी.जे.' ध्वनौ मृत्युमाप्ताः क्वचित्।
उत्सवायोजनं यत्र मृत्युप्रदं
भारतासभ्यताऽहर्निशं वर्धते ।।४।।

उत्सवे हर्षतो गोलिकाचालने
चातिशय्ये ध्वनौ वा स्फुल्लिङ्गैः परैः।
मृत्युमाप्ताः क्वचित्सज्जना बालकाः
भारतासभ्यताऽहर्निशं वर्धते ।।५।।

प्रीतिभोजोत्सवं कृष्णमुद्राव्ययैः
पश्यता चाधमर्ण्यात्तथा योज्यते।
दुःखभाजा ततश्चौर्यमाश्रीयते
भारतासभ्यताऽहर्निशं वर्धते ।।६।।

रस्यगोलं च काजूपनीरादयः
प्रीतिभोजे ह्यधो मर्दिता आसते।
यत्र राष्ट्रे क्षुधा मृत्युराश्रूयते
भारतासभ्यताऽहर्निशं वर्धते ।।७।।

गृद्धभोजे स्वयं खाद्यमाचीयते
भोज्यशक्त्याधिकं गृह्यते त्यज्यते।
दूषितायां प्रणाल्यां हि तत् क्षिप्यते
भारतासभ्यताऽहर्निशं वर्धते।। ८ ।।

यत्र पाणिग्रहे चोत्सवे नर्तने
प्रायशो मार्गरोधो दरीदृश्यते।
भोजनं चार्द्धरात्रात्परं गृह्यते
भारतासभ्यताऽहर्निशं वर्धते।। ९ ।।

उत्सवे चाग्रपङ्क्तौ स्थिताः सज्जनाः
कोऽपि नेता विलम्बेन चेदागतः।
तान् समुत्थाप्य तस्मै पदं दीयते
भारतासभ्यताऽहर्निशं वर्धते ।।१०।।

सेतुतश्चाधिको राशिरुद्घाटने
नेतृरक्षाव्यये नामपट्टेऽन्वितः।
नेतृसंरक्षणे राष्ट्रमग्रेसरं
भारतासभ्यताऽहर्निशं वर्धते ।। ११ ।।

लोकतन्त्रं कथं चेत्सुता मन्त्रिणां
प्रायशः प्रान्तराष्ट्रादिदृष्ट्या चिताः।
राजतन्त्रेऽप्यहो लोकतन्त्रभ्रमो
भारतासभ्यताऽहर्निशं वर्धते।। १२ ।।

अङ्गुलिं यस्य धृत्वा प्रबुद्धोऽभवद्
राजनेता पुनस्तेन नाद्रीयते।
तस्य नास्ते गुरुमार्गदर्शी च नो
भारतासभ्यताऽहर्निशं वर्धते।। १३ ।।

रामवच्चैकवस्त्रं दधन्मानवः
कोऽपि गान्धी महात्माऽत्र राष्ट्रेऽभवत्।
राष्ट्रमुक्तिप्रदः सोऽपि नाद्रीयते
भारतासभ्यताऽहर्निशं वर्धते।। १४ ।।

शैशवादेव वंशस्य कार्यान्वितौ
दक्षता सन्ततौ भाति नैसर्गिकी।
साऽपि चारक्षणे ह्यद्य नाशं गता
भारतासभ्यताऽहर्निशं वर्धते।। १५ ।।

रामवन्नास्ति नेता क्वचिद् भारते
स्वागतं यस्य सर्वत्र सम्भाव्यते।
तस्य मृत्योर्भयं चानिशं विद्यते
भारतासभ्यताऽहर्निशं वर्धते।। १६ ।।

नेतृरक्षाकृते गोलिकारोधकं
वस्त्रमाभ्यन्तरं कञ्चुकं धार्यते।
वाहने चापि काचस्तथाशक्तिमान्
भारतासभ्यताऽहर्निशं वर्धते।। १७ ।।

कापि नास्था दले नापि सिद्धान्तता
यज्जयो निश्चितो मन्त्रिणश्चास्पदम्।
नेतृभिः स्वार्थसिद्धौ समालोक्यते
भारतासभ्यताऽहर्निशं वर्धते।। १८ ।।

नो कनिष्ठैर्वरिष्ठः समाद्रीयते
यत्र मुख्ये प्रधाने पदे प्रायशः।
स्वार्थसिद्धिः पराधीयते दृश्यते
भारतासभ्यताऽहर्निशं वर्धते।। १९ ।।

राष्ट्रगातङ्कजान् येन हत्वा समान्
सेतुबन्धेन तत्प्रेषकं रावणम्।
यो जघानाद्य रामः स नो मन्यते
भारतासभ्यताऽहर्निशं वर्धते।। २० ।।

कुत्रचित्पीयते यत्र नद्या जलं
कुत्रचिद्वारियन्त्राप्तटङ्कीजलम्।
ये समृद्धा पिबन्त्यत्र चारोजलं
भारतासभ्यताऽहर्निशं वर्धते।। २१ ।।

छात्रवर्गाः क्वचिद्भूमिपट्टे स्थिताः
कुत्रचित्काष्ठपीठान्वितासन्दिकाः।
कुत्रचिद् वातयन्त्रं क्वचित्खर्परं
भारतासभ्यताऽहर्निशं वर्धते।। २२ ।।

वीक्षणे शिक्षकः स्वां हि कक्षां गतो
वा न वालोक्यते किन्तु पाठ्यं कथम्।
पाठयन्नस्ति नो वीक्ष्यते साम्प्रतं
भारतासभ्यताऽहर्निशं वर्धते।। २३ ।।

या क्रये–विक्रये संविदा युज्यते
साऽधुना शिक्षकाणां नियुक्तौ श्रिता।
शिक्षको वस्तुवद् गृह्यते त्यज्यते
भारतासभ्यताऽहर्निशं वर्धते।। २४।।

विश्वविद्यालयाचार्यरिक्ते पदे
शोधलग्नोऽतिथिश्छात्र आनीयते।
शासनोच्चे पदे किन्तु नायं विधिः
भारतासभ्यताऽहर्निशं वर्धते।। २५ ।।

शिक्षकाणां वरिष्ठश्च निर्देशकः
तादृशाचार्यरिक्ते पदे यो नवः।
किं कथं पुष्यतीति चिन्तेह नो
भारतासभ्यताऽहर्निशं वर्धते।। २६ ।।

पाठितोऽकिञ्चनेनात्मजो वृत्तये
हन्त! योग्योऽप्यनारक्षितो वञ्चितः।
अन्यराष्ट्रं गतः सैष सम्मान्यते
भारतासभ्यताऽहर्निशं वर्धते।। २७ ।।

यो हि शोधे क्षमोऽसौ धनाभावतः
शुल्कदानेऽसमर्थो न शोधे रतः।
अक्षमेभ्यो धनं प्राप्यते शासनाद्
भारतासभ्यताऽहर्निशं वर्धते।। २८ ।।

यस्य वासो महार्घं चतुश्चक्रिका
वातरम्या स्थितिः शासनस्य प्रियः।
सोऽथमास्ते वराचार्यवर्गेऽधुना
भारतासभ्यताऽहर्निशं वर्धते।। २९ ।।

स्तम्भरम्याः समे विश्वविद्यालयाः
किन्तु विद्यावरस्तम्भभूता न ते।
राष्ट्रमारक्षणान्नष्टविद्यं परं
भारतासभ्यताऽहर्निशं वर्धते।। ३० ।।

नास्ति दानाय विद्यार्थदात्री हि या
क्रीयते चाद्य सा स्वात्मजानां कृते।
क्रीतविद्यः स्वपुत्रोऽपि विक्रीयते
भारतासभ्यताऽहर्निशं वर्धते।। ३१ ।।

प्रायशो योग्यपुत्रो हि विक्रीयते
स्वल्पमूल्यप्रदातुः सुता दह्यते।
यौतुकं भ्रूणहत्याकृते कारणं
भारतासभ्यताऽहर्निशं वर्धते।। ३२ ।।

या हि गङ्गा परा विष्णुपादाम्भसा
ब्रह्मजः पुण्यपात्रा शिवाधारिता।
साऽपि दुर्नालिकादूषिता साम्प्रतं
भारतासभ्यताऽहर्निशं वर्धते।। ३३ ।।

राजमार्गे हरित्पादपाः प्रायशः
कर्तिता मार्गविस्तारहेतौ समे।

आतपाद्रक्षकाः शुद्धवायुप्रदा
भारतासभ्यताऽहर्निशं वर्धते।। ३४।।

रेलयानेऽनिशं तस्करा दस्यवः
सत्क्रिया यैर्हि सन्त्रासिता यात्रिणः।

रेलगारक्षकास्तान् न जानन्ति किं
भारतासभ्यताऽहर्निशं वर्धते।। ३५।।

योग्यपुत्रा विदेशे गताः साम्प्रतं
तेन माता–पिता स्तो हि बृद्धाश्रमे।

मातृदेवो भवेत्यादिसूक्तिर्हता
भारतासभ्यताऽहर्निशं वर्धते।। ३६ ।।

विज्ञवाल्मीकिपार्श्वं प्रिया गर्भिणी
प्रेषिता सन्ततेर्योग्यतायै परम्।

सैष नारीविमर्शे समालोच्यते
भारतासभ्यताऽहर्निशं वर्धते।। ३७ ।।

शासनोच्चे पदे संस्थितो नायकः
स्वप्रियासन्ततिप्रेमलग्नोऽधुना।

राष्ट्रचिन्ता गता वंशमोहे रते
भारतासभ्यताऽहर्निशं वर्धते।। ३८ ।।

यत्सुपुत्रद्वयेनैव सेना जिता
अश्वरक्षा समर्था न जाता च सा।

तस्य पत्नीपरित्याग आलोच्यते
भारतासभ्यताऽहर्निशं वर्धते।। ३९।।

राष्ट्रगातङ्किकाः प्रेषिता लङ्कया
तत्र गत्वा हतः प्रेषको राक्षसः।

येन रामेण तस्याऽपि निन्दाकरी
भारतासभ्यताऽहर्निशं वर्धते ।। ४० ।।

।। इत्यसभ्यताचत्वारिंशिका।।

—प्रो० बृजेशकुमारशुक्लः
लखनऊ

# प्रो० बृजेशकुमारशुक्लप्रणीतमभिनवकाव्यशास्त्रम्

# बृजेशयशोभूषणम्

## अथ प्रथमो विलासः

### मङ्गलाचरणम्

श्रीगणेशं नमस्कृत्य तदङ्घ्री परिभाव्य च।
काव्यशास्त्रस्य चर्चां तु स्वमत्या विवृणोम्यहम् ।।१।।

रसायते च काव्यं हि कविता मधुरायते।
यत्कृपया नमाम्येतां देवीं त्रिपुरसुन्दरीम्।।२।।

सरस्वत्याः श्रियं नौमि शब्दशक्तिस्वरूपिणीम्।।
कविताकामिनी यस्याः कृपया नूपुरायते ।।३।।

रसलीलार्णवं वन्दे शङ्करं कविताकरम्।
नमामि कवितालीञ्च श्रीकालीं काव्यविग्रहाम् ।।४।।

### पूर्वकाव्यशास्त्रीयाचार्यवन्दनम्

काव्यशास्त्रविधातॄन् च वन्दे पूर्वापरान् मुदा।
येषां ग्रन्था यथायोग्यं काव्यशास्त्रं वितन्वते।।५।।

भामहं भरतं वन्दे दण्डिनं रुद्रटं तथा।
उद्भटं चेन्दुराजं तु भट्टतौतं च शङ्कुकम्।।६।।

वामनं मङ्खुकञ्चैव श्रीमदानन्दवर्धनम्।
गुप्ताऽभिनवपादञ्च भट्टनायकमम्मटौ।।७।।

मुकुलं कुन्तकं वन्दे भोजराजञ्च वाग्भटौ।
रुरयकं महिमानं च नौमि श्रीविश्वनाथकम्।।८।।

शारदातनयं वन्दे धनिकञ्च धनञ्जयम्।
रामचन्द्रगुणैश्चन्द्रं विद्याधरं बुधं परम्।। ६ ।।

सागरनन्दिनं वन्दे हेमचन्द्रं तथैव च।
रूपगोस्वामिनं मिश्रं केशवं कर्णपूरकम् ।। १० ।।

शिङ्गभूपालकं नौमि भानुदत्तं रसप्रियम्।
विद्यानाथं जगन्नाथं जयदेवं तथैव च।। ११।।

राजशेखरनामानं कविशिक्षाप्रवर्त्तकम्।
अमरचन्द्रसूरिञ्च प्रणमामि मुहुर्मुहुः ।। १२।।

अप्पयमच्युतं भट्टं बालकृष्णबुधं तथा।
विश्वेश्वरं हृदा नौमि काव्यशास्त्रप्रवर्तकम् ।। १३ ।।

## नव्यकाव्यशास्त्रीयाचार्यवन्दनम्

काव्यशास्त्रप्रकर्त्तारो ये नव्याः सन्ति कोविदाः।
तेषां नामानि वक्ष्यामि कवितामाधुरीजुषाम् ।। १४ ।।

कविचन्द्रं नृसिंहञ्च भट्टमाशाधरं तथा।
हरिप्रसादमाचार्यं चिरञ्जीवं च न्यायगम्।।१५।।

देवशङ्करनामानं पुरोहितोपनामकम्।
श्रीकृष्णं नौम्यहं प्रीत्या सुधियं काव्यशास्त्रिणम् ।। १६।।

श्रीकृष्णब्रह्मतन्त्रञ्च परकालं तु वैष्णवम्।
शास्त्रिणं छज्जुरामञ्च वन्दे सोमेश्वरं तथा।। १७।।

रमाशङ्करनामा च श्रीपाठकवनेश्वरः।
प्रत्यक्षं चरणौ वन्दे चोभयोरपि धीमतोः ।। १८।।

गोविन्दचन्द्रपाण्डेयं ब्रह्मानन्दं सुधीवरम्।
उपाध्यायं शिवं वन्दे नरहरिं नमाम्यहम् ।। १६ ।।

कृष्णदीक्षितनामानं रामानन्दञ्च ठक्कुरम्।
मथुरादीक्षितं वन्दे सामराजं तु दीक्षितम्।। २०।।

विश्वनाथं ततो नौमि पञ्चाननोपनामकम्।
मनसा स्तौमि भूम्ना हि मौनिश्रीकृष्णभट्टकम् ।। २१।।

लक्ष्मीधरं तु दीक्षितं रामानन्दपतिं तथा।
विद्याया भूषणं नौमि बलदेवञ्च लक्ष्मणम् ।।२२।।

त्रिपाठिशिवरामञ्च मखिनं तु सदाशिवम्।
दीक्षितं श्रीनिवासञ्च सुखलालं नमाम्यहम् ।।२३।।

इन्दुपतिमुपाध्यायं वन्दे चित्रधरं तथा।
भट्टं गदाधरं नौमि गौरनार्यं च सद्धियम् ।।२४।।

सुब्रह्मण्यं तु कल्याणं वेङ्कप्रभुं तथैव च।
त्रिमल्लं वेणिदत्तं च प्रणमामि मुहुर्मुहुः ।। २५।

चमत्कारयुता वाणी काव्यशास्त्रे विजृम्भते।
बुधं रामप्रतापं तं प्रणमामि तु सद्धिया ।। २६।।

अमरनाथपाण्डेयं काव्यशास्त्रप्रचिन्तकम्।
वन्दे तं काव्यवागीशं सौन्दर्यलतिकासुमम्।। २७।।

काव्यशास्त्रे च सौन्दर्यं येनाकारि प्रयत्नतः।
नौमि द्विवेदिनं मूर्ध्ना रेवाप्रसादपण्डितम्।। २८।।

मिश्रोऽभिराजराजेन्द्रः संस्कृतस्य महाकविः।
यदीया कविताकान्ता सर्वत्र कोकिलायते।। २९।।

शेमुषी काव्यशास्त्रे हि यस्य नित्यं विजृम्भते।
तं नत्वा मिश्रराजेन्द्रं भृशं मोमुद्यते मनः।। ३०।।

काव्यशास्त्रे विधा या या नवा जाता रसात्मिकाः।
परिभाषाः खलूक्ता हि येन बोधाय भूरिशः ।। ३१।।

तं श्रीद्विवेदिनं वन्दे श्रीरहसविहारिणम्।
अजस्रं काव्यचर्चायां चित्तं यस्य चकास्त्यलम्।। ३२।।

राधाबल्लभनामा यो नवचिन्तनभूषणः।
येनाकारि नवं शास्त्रं तं नमामि त्रिपाठिनम् ।। ३३।।

न कालक्रमतश्चैते शास्त्राचार्याश्च बोधिताः
केवलमादरायैव बृजेशेनाऽभिवन्दिताः।। ३४।।

काव्यशास्त्रप्रणेतारो ये चान्ये सन्ति सूरयः।
न स्मृता विस्मृताश्चैते जयन्तु तेऽभिनन्दिताः।। ३५।।

श्रीभरद्वाजगोत्रजातेन विविधशास्त्रमर्मज्ञेन डा० बृजेशकुमार शुक्लेन प्रणीतेऽभिनवकाव्यशास्त्रे बृजेशयशोभूषणे मङ्गलाचरणं काव्यशास्त्रीया– चार्यवन्दनं नाम प्रथमो विलासः।।१।।

## अथ द्वितीयो विलासः

### अथ काव्यहेतवः

प्रतिभा काव्यहेतुः स्यात्काव्यानुशीलनं तथा।
कवितारचनावृत्तिर्वनिताऽऽरोचने यथा।। १।।

### अथ काव्यप्रयोजनम्

प्रयोजनं तु काव्यस्य चात्मतुष्टिः प्रकीर्त्तिता।
आत्माराम इवानन्दः सच्चिदानन्दबोधकः।। २।।

### अथ काव्यलक्षणं काव्यस्य वैलक्षण्यञ्च

कविकल्पितशब्दार्थौ त्रैलोक्यवर्णनापरौ।
काव्यमित्युच्यते प्राज्ञैरलङ्कारररसावहौ।। ३।।

लोकानुकीर्त्तनात्काव्यादास्वादोऽलौकिकोत्तमः।
वैलक्षण्यं तु काव्यस्य चेदमेव विदुर्बुधाः ।। ४।।

### शब्दशक्तिरर्थशक्ती च

एका शब्दस्य शक्तिः स्यात् सा चाऽभिधैव सम्मता।
लक्षणा व्यञ्जना चोभे त्वर्थशक्तितया मते।।५।।

अभिधाऽभिदधात्यर्थं सङ्केतितं सदैव हि।
अर्थे सङ्केतिते बाधे लक्षणा च प्रवर्तते।।६।।

मुग्धेव व्यञ्जना साऽर्थं त्वमन्दानन्दसम्भवम्।
चमत्कारपरं हृद्यं तनुते स्वकटाक्षवत्।।७।।

### एको वाचक एव शब्दो नाऽन्यः शब्दभेदः

न शब्दो दृश्यते कश्चिल्लक्षको व्यञ्जकस्तथा।
दृश्यते वाचकः शब्दोऽभिधया सोऽभिधीयते।।८।।

वाच्यस्य विस्तरो ज्ञेयो येन तात्पर्यमिष्यते।
स लक्ष्यः स न मुख्यः स्याद् गौण एवानुकीर्त्तते।।६।।

वाच्यस्य विस्तरः कश्चिन्नानाविधः प्रवर्तते।
व्यङ्ग्यः स तु परिज्ञेयो हावाश्च योषितामिव।।१०।।

**लक्षणाव्यञ्जनेऽर्थविस्तारिकाशक्ती न शब्दशक्ती**

अर्थविस्तारिकाशक्ती लक्षणाव्यञ्जने मते।
न स्यातां शब्दशक्ती हि लक्षणाव्यञ्जने त्वुभे।।११।।

काव्यशास्त्रधियः केचिदन्यथा प्रवदन्ति हि।
मतं निरस्य तेषां तु स्वमतं स्थापितं मया।।१२।।

व्यङ्ग्यार्थविस्तृतिस्तावद् यावद् बोधो न जायते।
भिन्नसंविदि बोधोऽपि भिन्नो भिन्नः प्रजायते।। १३।।

**संविद्भिन्नतयाऽर्थभिन्नत्वं प्रतीयमानत्वञ्च**

एकोऽपि वाचकः शब्दः संविद्भिन्नतया क्वचित्।
नानाविधं ददात्यर्थं प्रतीयमान उच्यते ।।१४।।

**वाच्यलक्ष्ययोरर्थविस्तारिका व्यञ्जना**

अञ्जना शोभते यद्वद् दीर्घापाङ्गसु नेत्रयोः।
व्यञ्जना तनुते ह्यर्थं वाच्यलक्ष्यार्थयोस्तथा।।१५।।

**लक्षणाव्यञ्जनयोर्भेदसङ्केतः**

लक्षणायाश्च ये भेदा मीमांसकमते मताः।
ते ग्राह्या नैव चान्ये तु गृह्यन्ते काव्यशास्त्रिभिः।।१६।।

शाब्दी चाऽऽर्थीति भेदेन या व्यञ्जना द्विधा मता।
सर्वत्र व्यञ्जनाऽऽर्थीति न शाब्दी भवति क्वचित् ।।१७।।

इति श्रीभरद्वाजगोत्रजातेन विविधशास्त्रमर्मज्ञेन डॉ० बृजेशकुमारशुक्लेन प्रणीतेऽभिनवकाव्यशास्त्रे बृजेशयशोभूषणे काव्यहेतुप्रयोजनभेदशब्दशक्तिनिरूपणं नाम द्वितीयो विलासः।

## अथ तृतीयो विलासः

## अथ रसस्वरूपम्

विभावैरनुभावैस्तु व्यभिचारिभिरेव च।
संयोगात् स्थापितः काव्ये रसो निष्पद्यते ध्रुवम्।।१।।

बोधितोऽभिधया भावो विभावादिमुखेन च।
शुद्धचैतन्यमासाद्य रसत्वं प्रतिपद्यते।।२।।

## अथ रसनिष्पत्तौ प्रतिबिम्बवादः

न तत्र व्यञ्जनाहेतुर्न चापि रसना मता।
प्रतिबिम्बस्तु शब्दस्य हृदये बिम्बितस्सदा ।।३।।

बिम्बिता च यथाऽऽदर्शे कान्ता सर्वातिशायिनी।
तथा हृद्दर्पणे भावाः शोभन्ते बिम्बिता इव।।४।।

तरङ्गिता हृदो भावा बुद्धौ रोहन्ति सर्वथा।
हृच्चक्रस्था यथा शक्तिः सहस्रारं प्रयाति वै।।५।।

एवं भावरसापन्नं काव्यमास्वाद्यते सदा।
नाट्येऽपि दर्शनाद्भावो बुद्धिमासाद्य रस्यते।।६।।

तत्रापि हृदयादर्शे मुख्यवृत्त्या निवेशिताः।
प्रतिबिम्बितभावाद्या रसत्वमुपयान्ति ते।।७।।

## रसनिष्पत्तावन्यवादनिरासः

नोत्पत्तिर्नहि भुक्तिस्तु रसस्य चोपपद्यते।
नानुमितिरभिव्यक्ती रसास्वादपरे मते।।८।।

## रसे साधारणीकरणं तस्य ब्रह्मास्वादसहोदरत्वञ्च

सञ्चोदिता विभावाद्या मुख्यवृत्तिमुखेन च।
बिम्बितास्तु हृदादर्शे बुद्धावायान्ति तत्क्षणात्।।९।।

रसरूपत्वमापन्ना ब्रह्मास्वादसहोदराः।
साधारणीकृतात्मानः स्वादयन्ति रसान्नव ।।१०।।

## अथ रससूत्रार्थः

संयोगार्थस्तु विज्ञेयः प्रतिबिम्बित एव हि।
रससूत्रे तु निष्पत्तिर्बुद्धौ निष्पन्नता भवेत्।।११।।

## रसस्य प्रतिबिम्बरूपत्वम्

भावानुभावसञ्चारिबिम्बरूपा भवन्ति च।
तत्प्रतिबिम्बरूपोऽसौ रमणीयो रसो भवेत्।।१२।।

इन्द्रियगोचरापन्नाः प्रतिबिम्बितभावकाः।
यावत्तिष्ठन्ति चित्ते हि तावदेव रसो भवेत्।।१३।।

## रसस्य विभावादेर्जीवितावधि स्थायित्वमलौकिकत्वञ्च

जीवितावधिपर्यन्तं विभावादे रसो मतः।
लौकिकेभ्यस्तु भावेभ्यो रसास्वादो ह्यलौकिकः ।।१४।।

## काव्ये नाट्ये च सर्वत्र नवैव स्थायिभावा रसाश्च

काव्ये नाट्ये च सर्वत्र रसा नवैव सम्मताः।
सर्वदेशे च काले हि त्वेत एव प्रतिष्ठिताः।।१५।।

नवैव स्थायिनो भावा लोकानां हृदयेषु हि।
बीजरूपा इवाभान्ति सार्वदेशिककालिकाः।।१६।।

क्रीडावात्सल्यभक्तयो मायाशास्त्रादयो रसाः।
ते सर्वे केवलं भावा रसत्वं नोफ्यान्ति वै।।१७।।

## शान्तरसस्य शम एव स्थायीभावः

शान्तरसस्य निर्वेदः स्थायी तु नोफ्फ्द्यते।
शान्तस्य शम एव स्यात्स्थायी भावो न संशयः ।।१८।।

## नवरसानां नामानि

शृङ्गारहास्यरौद्रकरुणवीरभयानकाः।
वीभत्साऽद्भुतशान्ताश्च रसाः स्युः काव्यनाट्ययोः।।१९।।

## शृङ्गाररस्य भेदौ

शृङ्गाररस्य च द्वौ भेदौ सम्भोगो विप्रलम्भकः।
नायकनायिकामेलः सम्भोगः कथ्यते बुधैः ।।२०।।

सम्भोग एकरूपः स्याच्चुम्बनादेस्त्वनन्तधा।
अतः सम्भोगभेदानां गणना न विधीयते ।।२१।।

उभयोर्विरहत्वेन विप्रलम्भः प्रकीर्त्तितः।
प्रवासादिप्रभेदेन पञ्चधा मम्मटादिभिः।।२२।।

शृङ्गारः कान्तविषया कान्तारतिः समुच्यते।
अन्यदेवादिविषया रतिर्भावोऽभिधीयते ।।२३।।

क्वचिद्व्यञ्जितसञ्चारी योषितां गण्डकूपयोः।
तुल्यो भात्यतुलनीयो भावो हृदयगोचरः ।।२४।।

भाव एव स विज्ञेयो हृद्हृद्यो रसिकेषु च।

**भावाभासरसाभासौ**

अनौचित्यप्रचोदिता भावा रसाः प्रवर्त्तिताः ।।२५।।
भावाभासरसाभासौ क्रमेण हि प्रकीर्त्तितौ।।

**भावोदयः, भावशान्तिः, भावसन्धिः, भावशबलत्वञ्च**

भावस्य चोदयः शान्तिः सन्धिः शबलता तथा।।२६।।

काव्यप्रकाशमार्गेण ग्रहीतव्या विपश्चिता।

**अथ वीररसभेदाः**

युद्धदानदयाधर्मशास्त्रवीरत्वभेदतः।।२७।।

पञ्चधा कथ्यते वीरो रसिकानां रसावहः।।
मम मते न भेदाः स्युरन्येष्वपि रसेष्वपि।।२८।।

इति श्रीभरद्वाजगोत्रजातेन विविधशास्त्रमर्मज्ञेन प्रो० बृजेशकुमारशुक्लेन प्रणीतेऽभिनवकाव्यशास्त्रे बृजेशयशोभूषणे रसादिनिरूपणं नाम तृतीयो विलासः।। ३।।

***

**डॉ० मितालीदेवः**
वाराणसी

# वैदिकं देवरहस्यम्

वैदिकानि तत्त्वानि पञ्चधा विभज्यन्ते। ऋषयः, पितरः, देवाः, असुराः गन्धर्वाश्चेति। एतेषां समष्टिरेव सूक्ष्मं जगदित्याख्यायते। सूक्ष्मं जगदेव देवानां मुख्यं प्रतिपाद्यम्। एषां पञ्चानां विज्ञानेन सर्वं वैदिकं तत्त्वं सुविज्ञातं भवति। वैदिकं सर्वमपि विज्ञानं प्राणतत्त्वमाधारीकृत्यैव प्रवर्तते। आधुनिकस्य विज्ञानस्याधारभूता यथा विद्युच्छक्तिः तथा वैदिकस्य विज्ञानस्य मूलाधारः प्राणतत्त्वमिति प्रतीयते। प्राणश्च रयिश्चेति द्वे मूलतत्त्वे। तत्र प्राणो मुख्यः, रयिस्त्तदधीना। तदुक्तम्–

**"प्रजाकामो वै प्रजापतिः, स तपोऽतप्यत स तपस्तप्त्वा मिथुनमुत्पादयते। रयिञ्च प्राणञ्चेत्येतौ मे बहुधा प्रजाः करिष्यत इति। आदित्यो ह वै प्राणौ रयिरेव चन्द्रमाः। रयिर्वा एतत्सर्वं यन्मूर्तञ्चामूर्तञ्च, तस्मान्मूर्तिरेव रयिः।"**[1]

अनया हि श्रुत्या सर्वेषां प्राणानामायतनं सूर्यः रयेश्चायतनं चन्द्रमा इति दर्शितम्। सर्वाश्च मूर्तयः पिण्डरूपा रयिनामकात्तत्त्वाज्जायन्ते प्राणरयी स्थूलताप्राप्तिक्रमेणाग्नीषोमौ भवतः अग्नीषोमाभ्यां च सर्वं जगदुत्पाद्यते–

**"अग्नीषोमात्मकं जगत्"**[2] प्राण एव सर्वस्यादिः स एव स्थूलामवस्थां गतो रयिपदवाच्यां भूतभौतिकावस्थां गच्छतीत्यप्यन्यत्रोक्तम्–

**असद्वा इदमग्र आसीत् तदाहुः किन्तदसदासीदिति, ऋषयो वाव तेऽग्रेऽसदासीत, तदाहुः के त ऋषय इति प्राणा वा ऋषयः।**[3]

अत्र हि पूर्वमसत्पदेन प्राणरूपाणामृषीणामभिधानं कृतम्। प्राणा एव सत्तारूपेण सर्वत्रानुप्रविशन्ति। प्राणेषु किञ्चिदन्यत् तत्त्वं सत्तारूपेण न प्रविशतीति तेषामसत्त्वमुक्तमिति।

शतपथब्राह्मणस्य चतुर्दशकाण्डे बृहदारण्यकोपनिषत्पदाऽभिधेये जनक–सभायामृषीणां परस्परं ब्रह्मोद्ये शाकल्यस्य प्रश्नानां याज्ञवल्क्येनोत्तरेण देवानामपि प्राणरूपता सुस्पष्टमाम्नाता। एवं हि तत्र शाकल्ययाज्ञवल्क्ययोः प्रश्नोत्तराणि

---

१. प्रश्नोपनिषदि १.४–५

२. बृ. जा. २.४.१

३. शतपथब्राह्मणे ६.१.१.१

श्रूयन्ते–

**"कति देवा याज्ञवल्क्येति। स हैतयैव निविदा प्रतिपेदे यावन्तो वैश्वदेवस्य निविद्युच्यन्ते त्रयश्च त्री च शता त्रयश्च त्री च सहस्रेत्योमिति होवाच। कत्येव देवा याज्ञवल्क्येति। त्रयस्त्रिंशदित्योमिति होवाच"**[1]

अनन्तरं पुनः पुनः प्रश्ने षट्, त्रयः, द्वौ, अध्यर्ध, एक इति क्रमेण देवसङ्ख्या भगवता याज्ञवल्क्येन निर्दिष्टा। विवरणप्रश्ने च अष्टौ वसवः एकादश रुद्राः, द्वादशादित्याः, इन्द्रश्च प्रजापतिश्चेति त्रयस्त्रिंशत्। तेषां सङ्क्षेपेण–अग्निश्च पृथिवी च वायुश्चान्तरिक्षं च द्यौश्चादित्यश्चेति षट्, तेषामपि सङ्क्षेपे तत्रापि लोकदेवयोरेकीकरणेन त्रयः, तत्राप्यनुस्यूततया अन्नं प्राणश्चेति द्वौ।

ततश्च कतमो अध्यर्ध विचारणीय इति प्रश्ने–"योऽयं पवत इति। तदाहुर्यदयमेक इवैव पवते। अथ कथमध्यर्ध इति। यदस्मिन्निदं सर्वमध्यार्ध्नोत्तेनाध्यर्ध इति।" एवमुत्तीर्य "कतम एको देवः" इति प्रश्नः "प्राणः" इति समाहितः, तस्यैव च बृंहणात् सर्वमिदं जातमिति तस्यैव ब्रह्मत्वमुक्तम्। "अमृतः पुरुषः" इत्यपि तस्य विवरणं तत्रैव कृतम्।

तदेतत्प्रकरणपर्यालोचनेन प्राण एव मुख्यो देवः। स च यद् भूतभौतिकमुत्पादयति तत्तस्य वशगत्वादर्धं गण्यत इत्यध्यर्धो देवो निर्दिष्टः। "यो यं पवते" इत्युक्तया च वायुरूपता तस्योक्ता। वायुरयं न भौतिकवायुर्मन्तव्यः, अपितु तस्य परिचालक आन्तरिक्ष्यः प्राणविशेषो वायुपदेन निर्दिष्टः। तस्यैकस्यैवाग्निः, वायु, आदित्य इति त्रीणि रूपाणि स्थानभेदेन प्रतिष्ठितानि। स्थानानां पृथिव्यन्तरिक्षदिवामपि स्थानिभिः सह परिगणने तु षड् देवाः। अग्न्यादीनामेकैकस्य पृथक् पृथगवस्थागणने, केन्द्रस्थस्येन्द्रस्य सर्वमण्डलव्यापकस्य प्रजापतेश्चापि सह गणने त्रयस्त्रिंशद् देवाः सम्पद्यन्ते। एषां चैकैकस्यानन्तकार्यकारित्वात् त्रयस्त्रिंशच्छतानि त्रयस्त्रिंशत्सहस्राणीत्यादि देवानां सङ्ख्या आख्याता। इदानीन्तु पुराणाद्याधारेण त्रयस्त्रिंशत् कोटय इत्यपि प्रसिद्धिः। सेयं सर्वाऽप्यनन्तकार्य–कारित्वाद् बोध्या। पृथक् पृथङ् नवग्रहणं तु त्रयस्त्रिंशद् एवं श्रुतिपुराणादिषु दृश्यते। त्रयस्त्रिंशत् सङ्ख्याः विवरणं तु ऋङ्मन्त्रेष्वपि श्रूयते–

**इति स्तुतासो असथा रिशादसो येस्थ त्रयश्च त्रिंशच्च।**
**मनोर्देवा यज्ञियासः**[2]

शाखान्तरमन्त्रे वस्वादिविवरणमपि श्रूयते–

---

१. बृहदारण्यकोपनिषदि ३.९.१

२. ऋग्वेदे ८.३०.२

**अग्निः प्रथमो वसुभिर्नो अव्यात्सोमो रुद्रेभिरभि रक्षतुत्मना।**
**इन्द्रो मरुद्भिर्ऋतुथा कृणोत्वादित्यैर्नो वरुणः शर्म संयत्।।**[१]

सङ्क्षिप्तं देवतात्रयं तु भगवान् यास्कोऽपि दैवतकाण्डे देवतानिरूपणे सिद्धान्तयति–

**"तिस्र एव देवता इति नैरुक्ताः, अग्निः पृथिवीस्थानः, वायुर्वा इन्द्रो वा अन्तरिक्षस्थानः, सूर्यो द्युस्थानः"**[२]

अत्र निरुक्तकृता स्थानिनः प्राणविशेषा एवं मुख्यतया देवपदवाच्या उक्ताः। अग्निवायू चेमौ निरुक्तकृता निरूप्यमाणौ न भौतिकौ, अपि तु प्राणरूपौ देवविशेषावेव–

**"यत्किञ्चिद्दार्ष्टिविषयकमग्निकमैव तत् या च का च बलकृतिरिन्द्रकर्मैव तत्, यत्किञ्चित्प्रवह्णीत–मादित्यकर्मैव तत्।**[३]

इति तेनैव तद्देवतास्वरूपव्याकरणाद् अन्तरिक्षे वायुर्वा इन्द्रो वेति विकल्पो य आख्यातस्तस्याशयमेवं भाष्यकारः श्रीदुर्गाचार्य आह यद् येषां कार्यं प्रत्यक्षं दृश्यते, त एव देवाः अत्रोक्ताः। भूम्यामग्निकार्यं दिवि चादित्यकार्यं प्रत्यक्षं दृश्यते। अन्तरिक्षे इन्द्रकार्यं विद्युदादि तु सदा न दृश्यते, कदाचिद् वर्षादावेव दृग्गोचरीभवतीति सदा दृश्यमानकार्यो वायुरेव समुचिततयाऽत्रोपात्तः। किन्तु यस्य स्तुतिर्वेदेषु शतसूक्तैस्समाम्नायते स देवराज इन्द्रोऽपि नोपेक्षामर्हतीत्यन्तरिक्षे द्वावपि देवावुपात्तौ। सदा दृश्यकार्यत्वाद् वायुः सर्वदेव–प्राधान्यात्तु इन्द्र इति।

तदित्थमृषयो देवाश्च प्राणविशेषा एवेति सम्यक् प्रमाणैः प्रसाधितम्। तत्र ऋषय आद्या देवास्तु तज्जन्या इत्यपि शतपथप्रमाणेन सङ्केतितं भगवान् मनुरप्येषां जन्यजनकभावमाह–

**ऋषिभ्यः पितरो जाताः पितृभ्यो देवदानवाः।**
**देवेभ्यस्तु जगत्सर्वं चरं स्थाण्वनुपूर्वशः।।**[४]

देवाश्च असुराश्चेति द्विविधाः प्राणाः पितृभ्य उत्पद्यन्ते। तत्र प्रकाशे देवानां प्राधान्यं तमसि त्वसुराणां प्राधान्यं केचिन् मन्यन्ते। अत एव रात्रिमासुरीमाहुः।

---

१. आश्वलायनश्रौतसूत्रे २.११
२. निरुक्ते दैवतकाणड – अ. प्रथम
३. निरुक्ते दै. का. अ.१
४. मनुस्मृतौ ३.२०१

ब्रह्मसूत्रेष्वपि देवताधिकरणे भगवता बादरायणेन देवानधिकृत्योक्तम्– **"ज्योतिषि भावाच्च"**[१] १.३.२२ इति ज्योतिषि संसक्ता एव देवा न तु शरीरभृतः। तेषां ब्रह्मविद्यालयामधिकारः कथं सम्भवेदिति तदभिप्रायः। एतत् सूत्रं व्याख्यातं श्रीशङ्कराचार्यपादैः शारीरकभाष्ये– "यदिदं ज्योतिर्मण्डलं द्युस्थानमहोरात्राभ्यां बभ्रमज्जगदवभासयति, तस्मिन्नादित्यादयो देवतावचनाः शब्दाः प्रयुज्यन्ते, लोकप्रसिद्धेर्वाक्यशेषप्रसिद्धेश्च, न च ज्योतिर्मण्डलस्य हृदयादिना विग्रहेण चेतनतयाऽर्थित्वादिना वा योगोऽवगन्तुं शक्यते मृदादिवदचेतनत्वावगमात् एतेनाग्न्यादयो व्याख्याताः"।

तेन सूर्यमण्डलसंसक्ततैवादित्यादीनां देवानां स्फुटीकृता। मण्डले संसक्ताश्च तत्परिचालकाः प्राणविशेषा एव देवपदवाच्या इत्युक्तं भवति। यत्वग्रिमसूत्रे देवानामप्यधिकारः प्रतिपादितः यच्च तत्र भाष्यकृद्भिर्व्याख्यातम्– "ज्योतिरादिविषया अपि आदित्यादयो देवतावचनाः शब्दाश्चेतनावन्तमैश्वर्याद्युपेतं तं तं देवतात्मानं समर्पयन्ति, मन्त्रार्थवादादिषु तथा व्यवहारात्। अस्ति ऐश्वर्यं योगाद्देवतानां यथेष्टं च तं तं विग्रहं ग्रहीतुं सामर्थ्यम्"।।

तदेतद् द्वैविध्यं देवानामग्रे व्याख्यास्यते। इह तु एतावदेव वक्तव्यं यत् प्रकाशभागो देवैः सम्पाद्यते, तत्रैव च त आवर्तमानास्तिष्ठन्ति। तमस्त्वसुरप्राणैः, सम्पादितम्, तत्रैव चासुराणां स्थितिः। एते देवा असुराश्च पितृप्राणेभ्य आविर्भवन्ति, एभ्यश्चाग्रे गन्धर्वप्राणः। तत्र ऋषयः सप्त, पितरोऽष्टौ, देवास्त्रयस्त्रिंशत्, असुरा नवनवतिः, गन्धर्वाः सप्तविंशतिरिति।

मानवास्तु मनोः प्राणादुत्पद्यन्ते। स चार्द्धेन्द्ररूपः। प्राणरूपा देवास्तत्सङ्ख्या त्रयस्त्रिंशच्च पूर्वं प्रतिपादिता। तेऽप्याध्यात्मादिभेदेन नानाविधत्वं प्रतिपद्यन्ते–

**अग्निर्वाग् भूत्वा मुखं प्राविशत् वायुः भूत्वा नासिके प्राविशत्**
**आदित्यश्चक्षुर्भूत्वा अक्षिणी प्राविशत्।**[२]

श्रुतिषु इन्द्रियाणां देवत्वमाध्यात्ममाम्नातम्। अधिदैवतं तारामण्डलेऽपि देवा विव्रियन्ते। सूर्यस्य तु सर्वदेवसमष्टित्वं प्रतिपादितम्–

**"चित्रं देवानामुदगादनीकम्**[३] इति सर्वत्र सुप्रसिद्धे सूर्योपस्थानमन्त्रेऽपि देवानां चित्रमनीकं सूर्य इति स्पष्टीभवत्येव। एवं चन्द्रमा देवता, नक्षत्रादि देवता, इत्याद्यपि रुद्राध्यायादिषु समाम्नायते, तेषु तेषु नक्षत्रेषु तद् योगतारानाम्ना

---

१. ब्रहमसूत्रे १.३.२२

२. ऐतरेयोपनिषदि

३. ऋग्वेदे १.११५.१

ज्योतिर्विद एकां तारां व्यवहरन्ति। सा देवरूपैव मन्यते। तामाश्रित्यैव च तत्तन्नक्षत्रदेवानां यागस्तैत्तिरीयब्राह्मणे तृतीयकाण्डे सुविस्तृतं वर्णितम्–

**स्वस्ति नः इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्वदेवाः।**
**स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु।।**[1]

अस्य पर्यालोचने क्रियमाणे संशयोऽयमुदेति यदिन्द्रस्य, पूष्णः, तार्क्ष्यस्य, बृहस्पतेश्च कः परस्परं सम्बन्धो येन ते मिलिता अत्र निर्दिष्टाः। द्विविधो हि देवानां सम्बन्धो निरुक्तकृता व्याख्यातः– संस्तविकश्च, एकहभिक्तित्वं च। उभयविधोऽपि नैष क्वाप्यन्यत्र दृष्टः। नैषां सम्मिलितानामुद्देश्येन क्वापि हविर्दानं विहितम्, नाप्येकस्थानस्थिताः, न चाप्यन्यत्र सहस्तुतिरपि श्रूयते।

यथा प्राणरूपा देवा वेदे प्रसिद्धाः त तथा प्राणिरूपा अपि ते वेदेषु समाम्नायन्ते।

**“अन्वाख्याने त्वदुद्यते, इतिहासे त्वत्”**[2], अत्र शतपथब्राह्मण उत्पत्याख्याने सृष्टिप्रक्रियायां देवा अन्ये भवन्ति, इतिहासे त्वन्य इति स्फुटमुक्तम्। इतिहासस्य सम्बन्धः प्राणिरूपैर्देवैरिति तदाशयः सङ्केतितम् :–

**सत्रस्य ऋद्धिरस्यागन्म ज्योतिरमृता अभूम।**
**दिवं पृथिव्या अध्यारुहामाविदाम देवान् स्वर्ज्योतिः।।**[3]

अत्र द्युलोकारोहणानन्तरं देवानां ज्ञानमाम्नातं तेन द्युलोके प्राणिभूता देवा निवसन्तीति सङ्केत्यते। सृष्टिक्रमे विकासवादो वेदपुराणादिष्वपि वर्णितः। आधुनिकवैज्ञानिकैरपि च स एव सिद्धान्तः तेन मन्यते। तत्र वैदिकदृष्ट्या पार्थिवेषु प्राणिषु सूर्याकर्षणं यावदवर्धत स एव प्राणिनां विकासः। प्राणिषु बुद्धिः सौरप्राणेभ्य एव प्रादुर्भवति वर्द्धते चेत्यस्मादाराध्येन ब्रह्म गायत्रीमन्त्रेणैव सुप्रसिद्धयति। यावदधिकं च यस्मिन्प्राणिनि सौरप्राणजनितं सूर्याभिमुखमाकर्षणं तावदेव स पृथिव्या आकर्षणाद् विमुच्यते बुद्धौ च तस्य प्रागल्भ्यं प्रवर्धते।

दैवसर्गान्तर्गताः प्राणिनस्तु स्वाभावादेव पृथिव्या आकर्षणाद् विमुक्ता अन्तरिक्षे दिवि च सदैव विचरणशीलाः। तेषां शरीरस्य सूक्ष्मभूतजन्यतया विद्याप्रभावेणान्तर्धानशीलतया च तेऽस्मत्प्रत्यक्षा न भवन्ति। लोकान्तरस्था देवा अपि द्विविधाः शास्त्रेष्वाख्यायन्ते– (१) अजानदेवाः, (२) कर्मदेवाश्च। सर्गारम्भ एव ये

---

१. यजुर्वेदे २४.१६

२. शतपथ ब्राह्मणे ११.१.६.६

३. यजुर्वेदे ८.५२

देवत्वं प्राप्तास्ते अजानदेवाः। ये तु मनुष्या यज्ञादिबलेन देवत्वं प्राप्नुवन्ति ते कर्मदेवाः। कर्मणा देवलोकप्राप्तिरपि श्रुतिषु बहुधाऽऽम्नायते– **"दिवं पृथिव्या अध्यारुहाम" इति मन्त्रे 'मर्तासः सन्तो अमृतत्वमानशुः"**[१]

**पूषा त्वेतश्च्यावयतु प्र विद्वाननष्टपशुर्भुवनस्य गोपाः।**
**स त्वैतेभ्यः परिददत् पितृभ्योऽग्निर्देवेभ्यः सुविदत्रियेभ्यः।।**[२]

इत्यत्रापि चाग्नेर्देवेषु प्रापणं मृतानां श्रूयते।

एवं बहुषु मन्त्रेषु द्रष्टव्यम्। एत एव देवाः "अष्टविकल्पो दैवः" इति साङ्ख्यकारिकायां चतुर्दशविधभूतसर्गो व्याख्यातः। इतोऽन्येऽपि पृथिवीस्था अपि देवाः श्रुतिष्वेवं श्रूयन्ते। तदुक्तं वाजसनेयश्रुतौ–

**"द्वया वै देवा देवाः अहैव देवाः अथ ये ब्राह्मणाः शुश्रुवांसोऽनूचानास्ते मनुष्यदेवाः"**[३] पृथिवीस्थेष्वप्यस्ति द्वैविध्यम्। उत्तरस्यां दिशि शर्यणावतः पर्वतस्योत्तरभागे प्रकृतिरचिता देवसंस्थामुपजीव्य पुरा पृथिव्यामपि देवसंस्था प्रकल्प्यते स्म– **"देवविशः कल्पयितव्या ता अनु मनुष्यविशः कल्प्यन्ते"**[४] इत्यादि ब्राह्मणश्रुतिषु तत्सङ्केतः स्पष्टमुपलभ्यते।

तदित्थं सङ्कलनया सप्तविधा अत्र देवा मया दिग्स्वरूपेण प्रदर्शिताः मुख्याः (१) प्राणरूपा देवाः (२) तेषामाध्यात्मरूपं (३) अधिदैवतं तारामण्डलादिषु रूपम् (४) अधिभूतमग्निवाय्वादि (५) लोकान्तरस्था प्राणिनो देवाः (६) भूमण्डलस्थाः सुमेरुप्रान्तवासिनो देवाः (७) भारतस्था विशिष्टा विद्वांसो वीराश्च देवाः। एतेषां सर्वेषां परस्परं कः सम्बन्धः? कुतश्चैकस्यैव देवशब्दस्य तद्विशेषवाचकानामिन्द्र–वरुणादिशब्दानां च विभिन्नेषु प्रवृत्तिरित्येवं वैदिकं देवरहस्यम्।

***

---

१. ऋग्वेदे १.११०.४
२. तदेव १०.१७.३
३. शतपथब्राह्मणे २.२.२.२६
४. ऐतरेयब्राह्मणे २.३२

**डॉ० श्रुतिकीर्तिः**
शिमोगा

# भासकर्णः

काव्यस्य प्रयोजनम्। सद्यःपरनिर्वृत्तिद्वारा सदुपदेशः। रस एव काव्यस्य जीवितम्। तथापि कविः सामाजिकदृष्ट्या काव्यं कवयित्वा आदर्शसमाजं व्यक्तिशालिं च निर्मातुं प्रभवति। अत एव उक्तं **"याद्वेदान्प्रभुसम्मिताद् अधिगतं शब्दप्रधानाच्चिरम्** इत्यादि। **"वेदोऽखिलो धर्ममूलं, काव्यं च वेदमूलम्**। अतो धर्माद्युपदेशोऽपि काव्यस्य प्रयोजनम्। अत एव उक्तम्–

**"काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये।**
**सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे।।**

तादृशः संस्कृतकाव्यप्रपञ्चः श्रव्यकाव्यं दृश्यकाव्यञ्चेति द्विधा विभक्तः। तयोः श्रव्यकाव्याद् दृश्यकाव्यमेव रमणीयमिति साहित्यरसिकाः विमर्शकाश्च कथयन्ति। तानि दृश्यकाव्यानि पुनः नायकभेद–वस्तुभेद–रसभेद–अङ्कसङ्ख्याभेद–रीत्या च रूपकम् उपरूपकं चेति द्विधा विभक्तानि।

तेषु असङ्ख्यसंस्कृतरूपकेषु भासप्रणीतान्येव अत्यन्तप्राचीनतमानीति एतावत्कालपर्यन्तचरितैः विदुषां संशोधनैः सिद्धानि। त्रयोदश चतुर्दश वा रूपकाणि भासप्रणीतानीति श्रूयते। तेषु महाभारतकथाधारितानि षट्। तेषु पञ्च एकाङ्कानि। एतेषु एकाङ्केषु **कर्णभारमपि** अस्ति। महाभारते कर्णपर्वाधिकृत्य रचितमिदम्। रूपकप्रकारेषु व्यायोगे अङ्के वा अन्तर्गतमिदमिति विद्वांसो मन्यन्ते। वीररसप्रधानमिदं रूपकम्। करुणोऽप्यत्र अङ्गत्या वर्तते।

**कर्णभारम्** इत्यस्य कर्णस्य भारम् कर्णस्य कर्तव्यम् वा इत्यर्थः। अस्मिन् एकाङ्के ब्राह्मणवेषधारिणे इन्द्राय कर्णः स्वकीयानि कवचकुण्डलानि दत्त्वा दानवीरोऽभवत्। तां दानवीरताम् निरूपितवान् भासकविः।

श्रीकृष्णानुग्रहेण अर्जुनस्य प्रतिज्ञा पूरिता। घटोत्कचोऽपि हतः। द्रोणाचार्यः स्वर्गस्थः। भारतयुद्धे पञ्चदशदिनानि गतानि। षोडशे दिने कर्णः कुरुसेनानायकभारं स्वीकृत्य शल्यसारथ्ये युद्धमारभ्य स्वस्यभारं निरूढवान्। कर्णः पाण्डवान् नैव जन्ममात्रेण ज्येष्ठः अपितु। शौर्यौदार्यादिसकलसद्गुणैर्ज्येष्ठः श्रेष्ठश्चासीत्। परन्तु **विधेः विचित्राणि विचेष्टितानि** इत्येतदुक्त्यनुसारेण प्रतिकूलदैवेन तस्य शौर्यौदार्यौ

गुणावेव तस्य मरणहेतुत्वम् अभवताम्। एवं कर्णस्य शौर्यौदार्यौ गुणावेव स्वस्यैव हननाय शूलौ जाताविति भासो निरूपितवान् अस्मिन्नेकाङ्के रूपके।

क्षत्रियेषु वीरौदार्यौ गुणावत्यावश्यकौ। एतयोरतिप्रमाणमवगुणो भूत्वा प्रतिकूलदैवोपहतस्य कर्णस्य जीवनं वीररसेन पूरितम्। अस्मिन्नेकाङ्के सर्वत्र कर्ण एवाऽवलोक्यते। शल्यः सारथिः। इन्द्रोऽपि याचको ब्राह्मणः। कृष्णार्जुनयोः कुतन्त्रकुशलयोश्चित्रणमेवाऽत्र नास्ति।

**कर्तव्यं रणशिरसि प्रियं कुरूणां**
**द्रष्टव्यो यदि स भवद्धनञ्जयो मे।**

इति वीरोत्साहेन उक्त्वा शल्येन सह युद्धरङ्गे प्रविशति। कर्णस्यैतया वाचा दुर्योधनं प्रति तस्य कृतज्ञताभावः दृश्यते।

रणरङ्गप्रवेशात्पूर्वमेव कुन्तीकृष्णपरशुरामाः तस्य जीवं अपहृतवन्तः। अवशिष्टानि कवचकुण्डलान्येव। रणरङ्गं प्रविशन्नेव शल्यमुद्दिश्य स्वस्य अस्त्रविद्यावृत्तान्तं वर्णयति कर्णः। परशुरामेण दत्तं शापं संस्मृत्य अस्त्राणि परीक्षते। तानि सर्वाणि निर्वीर्याणि सञ्जातानि। शङ्खदुन्दुभयः निःशब्दाः। गजाश्वाः स्खलन्ति। एवं श्रमेण अधिगतानि अस्त्राणि सर्वाणि प्रयोगसमये अप्रयोजकानि भवेयुः इति पुरा भार्गवेण शप्तोऽपि कर्णः तस्मिन् गुरुभक्तिमेव प्रदर्शितवान्। तम् मुनिवरं भृगुवंशकेतुञ्च वर्णयति। एवं कर्णः स्वगुरुभक्तिं प्रदश्र्य सात्विकश्रेष्ठः अभवत्।

ईदृशं मनोव्याकुलभारमापन्नोऽपि सः युद्धविमुखो नाभवत्। स्वस्य सेनाभरं सुष्ठु निरूढवान्–

**हतोऽपि लभते स्वर्गं जित्त्वा तु लभते यशः।**
**उभे बहुमते लोके नास्ति निष्फलता रणे।।**

**मम शरवरवेगैरर्जुनं पातयित्वा।**
**वनमिव हतसिंहं सुप्रवेशं करोमि।।**

**अक्षयोऽस्तु रणेष्वपराङ्मुखानाम्** इत्यादि क्षत्रियोचितवाण्या उज्ज्वलमहानक्षत्रमिव युद्धरङ्गं प्रकाशयति। **यत्रासौ अर्जुनः तत्रैव चोद्यताम् मम रथः** इति अर्जुनं प्रति रथं नेतुं सारथिं चोदयति। एवं कर्णः क्षत्रियोचितपौरुषेण स्वस्य क्षात्रतेजः प्रकटयति।

अस्मिन् समये ब्राह्मणवेषधारी इन्द्र आगत्य कर्णं महत्तरां भिक्षां याचते। ब्राह्मणवचः श्रवणेन **श्रीमान् एष न केवलं द्विजवरो यस्मात् प्रभावान् महान्**

इत्युक्त्वा आगतः असौ महानुभावः इति स्वस्य मनसि निर्णीतवान्। **कर्णो भवन्तमहमेष नमस्करोमि** इति ब्राह्मणं वन्दते।

**सूर्य इव तिष्ठतु ते यशः** इति ब्राह्मणाशीर्वादं श्रुत्वा **हतेषु देहेषु गुणा धरन्ते। एतदेव शोभनम्** इति तद् आर्शीर्वचनं मनसा स्वीकृत्य **किम् अपेक्षितवन्तः भवन्तः?** इति तं पृच्छति। ब्राह्मणः अनेकानि वस्तूनि निराचकार। अन्तिमे कर्णः **देवासुरैरपि अभेद्यान् मम कवचकुण्डलान् गृह्णातु** इति उच्चैर्वदति। तत् समये शल्यः कर्णं वारयति। तदा **हुतऽ च दतऽ च तथैव तिष्ठति** इति स्वस्य कवचादिदानकृत्यं समर्थयति। एवमिन्द्रेण कवचकुण्डलान्यपि अपहृत्य देहजञ्जरमात्रावशिष्टः कृतः कर्णः। **शत्रुः एव मया वञ्चितः, अद्य खलु कृतार्थं कृतः खलु पाकशासनः** इति शल्यं सान्त्वयामास। एवं कर्णः ब्राह्मणविषये स्वस्य गौरवं प्रकटितवान्।

देवेन्द्रः कवचकुण्डलान्यादाय विमला नाम अस्त्रं प्रेषितवान् दूतद्वारा। **दत्तस्य न प्रतिगृह्णामि** इति प्रथमं तन् निराकृत्य अनन्तरं ब्राह्मणवचनमिति तत् स्वीकृतवान्। मूलकाव्ये स्वप्ने सूर्यस्य सूचनानुसारेण अस्त्रविनिमयेन कवचकुण्डलानि कर्णो ददाति। एवं भासकर्णः व्यासकर्णाद् दातृश्रेष्ठः भविष्यति।

अत्र महानुभावस्य कर्णस्य मरणसूचना नास्ति। ईदृशस्य महानुभावस्य मरणं चित्रयितुं भासकविर्नेच्छति।

संस्कृतसाहित्ये एषा उक्तिरस्ति किल –

**अपारे काव्यसंसारे कविरेकः प्रजापतिः।**
**यथास्मै रोचते विश्वं तथेदं परिवर्तते।।**

तदनुसारेण भासः स्वस्य काले स्थितानां सहृदयानाम् अभिरुचिं ज्ञात्वा मूल वस्तु स्वेच्छया परिवर्त्य एकांङ्कमिदं रचितवान्।

एवं भासकर्णः कृतज्ञः, शूराग्रणी, गुरुभक्तः, दानवीरः, शौर्यपराक्रमयोर्ज्योतिश्चाऽभवत्।

***

प्रो० ओम्प्रकाशपाण्डेयः
लखनऊ

## न काश्मीरेषु त्रैवर्णध्वजोत्पवने वयं शक्ताः

विचित्रापि स्वदेशे कीदृशी विषमा स्थितिर्जाता
न काश्मीरेषु त्रैवर्णध्वजोत्पवने वयं शक्ताः।
अकस्मादेव सैषा दुःस्थितिर्नैवाद्य सञ्जाता
विपक्षे तत्र ते तिष्ठन्ति येऽस्माभिर्भृशं पुष्टाः।।१।।

प्रदेशो भारतीयः संविधानं किन्तु तद्भिन्नं
न मुद्रैवास्मदीया तत्र किञ्चिद् वेत्ति सम्मानम्।
जनाः केचित् पृथग्व्यवहारिणस्तथैव रिपुनिष्ठाः
वदन्तो भिन्नतावाचं मनः कुर्वन्ति नो खिन्नम् ।।२।।

इदं नः शारदाक्षेत्रं वितस्तायास्तटे रम्यं
महामाहेश्वराचार्याभिनवगुप्तेति विख्याताः।
समूचुस्तन्त्रविज्ञानं परं शैवागमाल्लब्धं
ध्वनेस्तत्त्वं समीक्ष्याद्ये रसास्तैरेव चाख्याताः।।३।।

इदानीं नैव तत्तन्त्रं, न च स्पन्दो, भवत्यन्यम्,
विमर्शः प्रत्यभिज्ञाया न सन्तनुतेऽपि चैतन्यम्।
प्रकाशो नैव संवित्तिर्न तन्त्रालोकिनी चर्चा,
न काश्मीरेषु शिवदृष्टिस्त्विदानीं नैव देवार्चा।। ४।।

नहि भ्रमराः, स्वयं देवाङ्गना आयन्ति यस्यां भुवि,
क्वचित् केदारिकाखण्डेषु केसरगन्धमाघ्रातुम्।
सदाऽऽगच्छन्ति स्वर्लोकात् सुरा अपि यत्र सामोदं
प्रसूनेषु प्रफुल्लं पाटलं पुष्पं समादातुम्।।५।।

नदी–गिरि–निर्झराणां यत्र सौन्दर्यम्मनो हरते,
प्रसन्नाम्भोऽध्वनीनां श्रम–क्लान्तिं ह्यपाकुरुते।
रसाप्लुतदुर्लभस्वादूनि नित्यं संप्रयच्छन्ती
द्रुमाणां सन्ततिः सुफलानि, सौहार्दं समातनुते।।६।।

मनोज्ञाः शाद्वला वप्राः सुदूरं विस्तृता भूमौ
हरीतिम्नाशु लोचनयोर्महारासं प्रकुर्वन्ति।
धनुश्चैन्द्रं तनोतीहैव रविरश्मिर्हिमापाये,
सुवर्णैरुत्सवं विटपा वसन्ततौं युयुक्षन्ति।।७।।

इमां सर्वां समृद्धिं सौख्य–सौहार्दं परे भङ्क्तुम्
यतन्ते शत्रवः प्रतिवेशादद्य सन्नद्धाः।
इमे धर्मान्धताग्रस्ताः कशार्हा हिंसकाः शस्त्रै
र्निरीहान् ध्नन्ति काश्मीरेषु निर्दोषाञ्जनान् मुग्धाः।।८।।

इयं कश्मीरभूमिर्देवभूमिर्नः समाराध्या
महादेवः स्वयं तिष्ठत्यमरनाथस्वरूपोऽत्र।
न पाकिस्तानतो भस्मासुराः शक्ताः पराजेतुं
न चीनश्चैव प्राचीनं यशो हर्तुं समर्थोऽत्र।।९।।

इयं सा सप्तसैन्धवसंस्कृतेरुत्कर्षभूर्भुवने,
ऋचः सामानि चच्छन्दांसि संदृष्टानि यत्रैव।
सभुद्भूता शिवा सत्यस्वरूपा मानवीयापि
श्रुतेरार्षप्रभोज्ज्वलदिव्यजीवनदृष्टिरत्रैव।।१०।।

इयं सा सर्वकल्याणी च सर्वग्राहिणी भूमिः
परिस्पन्दश्च सुच्छन्दो बभूवात्रैव सर्वेषाम्।
सदाऽत्र श्रीपुरन्निकषाभवत् सर्वङ्कषा सृष्टिः
सहिष्णौ सुप्रदेशेऽस्मिन् न संल्लग्नं मनः केषाम् ।।११।।

प्रणीतं कल्हणप्रमुखैर्महाकविभिस्तरङ्गिण्यां
मनागालोकय श्रीमन्! प्रकृष्टं तत् पुरावृत्तम्
मिथो राजप्रजानां सर्वधर्माणाञ्च माधुर्यम्
चरित्रञ्चैव सद्भावः सुवृत्तं तत्र समुदात्तम्।।१२।।

इदानीं नैव सत्तत्त्वानि काश्मीरेषु विद्यन्ते
समस्तं भारतं प्रति वर्तते दुर्भावना–दृष्टिः।
विरोधो भारतीयानामनल्पश्चास्ति विद्वेषः
परन्नो नेतृभिः क्रियते प्रभूता वित्त–संवृष्टिः।।१३।।

बभूवुर्वंशजाः प्रज्ञावतां ये मम्मटादीनां
भयादातङ्कितास्ते पण्डिता निष्काशिताः प्रसभम्।
पटान्तर्वासिनो रथ्यासु वीक्ष्याद्यापि तान् खिन्नन्
पुरेष्वन्येषु, चित्तं दूयते कष्टान्न चास्माकम् ।।१४।।

मतान्धा दस्यवः शस्त्रास्त्रहस्ताश्चैव सोन्मादाः
समागच्छन्ति पाकिस्तानदेशादत्र निःशङ्कम्।
बलादातङ्किनः प्रायेण काश्मीरेषु चाऽसभ्या
विनष्टुं बन्धुतां शान्तिं समन्वयवृत्तिमस्माकम्।।१५।।

न चेयं दुर्दशा काश्मीरभागेष्वेव जागर्ति
भृशं पूर्वोत्तरक्षेत्रं हि बाह्योपद्रवैर्ग्रस्तम्।
असम्मरुणाचलन्नागाप्रदेशं तन्मणिप्रान्तं
प्रकुर्वन्त्येव देशद्रोहिणः क्षुब्धञ्च सन्त्रस्तम्।।१६।।

परन्नो नेतृवर्गे स्वार्थमूलाऽपस्पशा वृत्ति–
र्द्विधग्रस्तं मनो, लोभोमतानां, शासनेऽशक्तिः।
अनिच्छा राजनीतौ विद्यते राष्ट्रं दृढीकर्तुं
वयं विद्मो न, कस्मादस्ति दिल्ल्यां शत्रुषु प्रीतिः।।१७।।

इमे नः कर्णधाराः केवलं सिंहासने सक्ताः
समीहन्ते कथञ्चिल्लिप्सया निर्वाचने जेतुम्।
अमी नित्यं समुद्युक्ता पदं वित्तञ्च सम्प्राप्तुं
तदर्थं चान्यथा कर्तुं स्वराष्ट्रं वापि विक्रेतुम्।।१८।।

हिमाच्छन्नामगम्यां दुर्गमां वा मातृभूमिं स्वां
समुन्निद्राः प्रवीराः सैनिकाः रक्षन्त्यहोरात्रम्।
परन्नः सर्वकारो नेतृवर्गो राष्ट्रियं वा तज्
जितं शक्त्या प्रयच्छति शत्रवे सन्धौ स्वसुक्षेत्रम्।।१९।।

रुचिर्नैवास्ति तेषामद्य राष्ट्रियचिन्तने स्वल्पा,
न देशस्यापि सीमानं तथा संरक्षितुं चिन्ता।
अखण्डं राष्ट्रमस्माकं कथं सबलं समर्थं स्या
दिति प्रश्नेषु नेतारो विचारयितुं नहि व्यस्ताः ।।२०।।

गता वैदेशिकाः प्रभवो व्यतीतं शासनं तेषां
परं शास्त्रेषु तेषामेव विद्वांसः समारूढाः।
'विभज्यैव प्रभुत्वं भारते भवतीति दुर्नीतिं
विलज्जा व्याहरन्त्यद्यापि नेतारश्च दिङ्मूढाः।।२१।।

दृढेच्छा स्वत्वरक्षायै भवेच्चेदत्र जीवन्ती
ह्यलं भस्मासुरीयं तद्बलं, विफलं भवेत् सर्वम्।
रिपूञ्जेतुं समुत्पन्नो भवेच्चेदद्य सङ्कल्पः
करिष्यत्येव दृपानाम्मदञ्चैषः स्वतः खर्वम्।।२२।।

***

**डॉ. ममता गुप्ता**
जबलपुरम्

# वाच्यालङ्काराणां गुणीभूतव्यङ्ग्यत्वम्

ध्वनिसम्प्रदायप्रवर्तको ध्वनिकारोपाधिभूषित आचार्यआनन्दवर्धनो ध्वन्यालोकस्य तृतीयोद्योते गुणीभूतव्यङ्ग्यकाव्यनिरूपणे वाच्यालङ्कारान् चर्चितवान्। सोऽन्येषामलङ्कारिकाणामिव पृथक्–पृथगलङ्काराणां स्वरूपाणि लक्षणानि च न प्रतिपादितवान्। तस्य मते गुणीभूतव्यङ्ग्यमेवालङ्काराणां सामान्यं लक्षणमस्ति। इति कथम् ?

ध्वनिकारो मनुते यत् समस्तवाच्यालङ्कारवर्गोऽयमपरालङ्कार–रूपव्यङ्ग्यस्य वस्तुरूपव्यङ्ग्यस्य वा संस्पर्शेनैव चारुत्वातिशयं विभर्ति–

**वाच्यालङ्कारवर्गोऽयं व्यङ्ग्यांशानुगमे सति।**
**प्रायेणैव परां छायां विभ्रल्लक्ष्ये निरीक्ष्यते।।**[1]

**वाच्यालङ्कारवर्गोऽयं व्यङ्ग्यांशस्यालङ्कारस्य वस्तुमात्रस्य वा यथायोगमनुगमे सति च्छायातिशयं विभ्रल्लक्षणकारैरेकदेशेन दर्शितः।**[2]

न केवलं ध्वनिवादिनोऽपितु तेषां पूर्ववर्तिन आचार्या अप्यलङ्कारेषु अनभिधेयार्थानां प्रतीतिं स्वीकुर्वन्ति। तैः समासोक्तिपर्यायोक्तप्रतिवस्तूपमा–व्यतिरेकापह्नुतिप्रभृतिनामालङ्काराणां सन्दर्भे 'गम्येते', 'अनुक्त', 'अनभिधाने' आदिशब्दैरनभिधेयार्थाः प्रदर्शिताः।[3] यथा भामहोक्ते प्रतिवस्तूपमालक्षणे–

---

१. ध्वन्यालोके ३.३६

२. तत्रैव – वृत्तिः

१. (क) समानवस्तुन्यासेन प्रतिवस्तूपमोच्यते।
यथेव नाभिधानेऽपि गुणसाम्यप्रतीतिः।। काव्यालङ्कारे २.३४
(ख) वस्तुकिञ्चितदुपन्यसनात्तत्सधर्मणः।
साम्य प्रतीतिरस्तीति प्रतिवस्तूपमा यथा।। काव्यादर्शे २.४६
(ग) शब्दोपादनसादृश्यव्यतिरेकोऽयमीदृशः।
प्रतीयमानसादृश्योऽप्यस्ति सोऽप्यभिधीयते।। तदेव २.१८६
(घ) अपह्नुतिरभीष्टा च किञ्चिदन्तर्गतोपमा।
भूतार्थापह्नवादस्याः क्रियते वाभिधा यथा। काव्यालङ्कारे २.२१
(ङ) उपमानाक्षेपश्चाक्षेपः। काव्यालङ्कारसूत्रवृतौ ४.३.२७
(च) यथाकथञ्चित् सादृश्यं यत्रोद्भूतं प्रतीयते।
उपमा नाम सा। काव्यादर्शे २/१४

**समानवस्तुन्यासेन प्रतिवस्तूपमोच्यते।**
**यथेवानभिधानेऽपि गुणसाम्यप्रतीतितः।।**[४]

अस्योदाहरणम्–

**कियन्तः सन्ति गुणिनः साधुसाधारणश्रियः।**
**स्वादुपाकफला नम्राः कियन्तो वाध्वशाखिनः।।**[५]

अत्रानाभिधेयार्थ एव चमत्कृतिहेतुः। ध्वनिकारमते समासोक्त्यादीना–मिवान्येऽप्यलङ्कारा यदा व्यङ्ग्यरूपेण वस्त्वन्तरेणालङ्कारान्तरेण वा समन्विता भवन्ति तदैव परां छायामाश्लिष्यन्ति। इति कथम् ?

प्रथमतस्तु समस्तवाच्यालङ्कारवर्गस्यातिशयोक्तिगर्भता सम्भवति। यथोक्तं ध्वनिकारेण–

**यतः प्रथमं तावदातिशयोक्तिगर्भता सर्वालङ्कारेषु शक्यक्रिया।**
**कृतैव च सा महाकविभिः कामपि काव्यच्छायां पुष्यति।**[६]

प्रमाणरूपेण सः भामहोक्तिं उद्धरति–

**सैषा सर्वैव वक्रोक्तरनयार्थो विभाव्यते।**
**यत्नोऽस्य कविना कार्यः कोऽलङ्कारोऽनया विना।।**[७]

**औचित्येनोक्तं लोकोत्तरकथनमेव अतिशयोक्ति।**[८] तया विनाऽलङ्कारा–सम्भवात्वाद् भामहो **'लेशं', 'हेतु' 'सूक्ष्मञ्**चालङ्कारश्रेण्यां न गणयति। इयमतिशयोक्तिर्यमलङ्कारमधितिष्ठति स एव कविशक्तिवशादलङ्कारतां प्राप्नोति, शोभां धारयति, अन्यथा तु स नाममात्रेणैव अलङ्कारो भवति। **सैषा सर्वैव वक्रोक्त्यादौ** अभेदोपचारेण अर्थसङ्गता भवति, यथा आयुर्निष्पादकत्वाद् **'आयुर्घृतं'** इति प्रयुज्यते तथैव सर्वालङ्कारनिष्पादनयोग्यत्वादतिशयोक्तिः सर्वालङ्काररूपा भवति।[९] इयं अतिशयोक्तिः सर्वेषु अलङ्कारेषु न केवलं व्यङ्ग्यरूपेणाऽन्तर्लीनं वर्ततेऽपितु तस्या अलङ्कारान्तरसङ्कीर्णत्वं कदाचिद् वाच्यरूपेण कदाचिद् व्यङ्ग्यरूपेण दृश्यते। यत्र वाच्यत्वेन सङ्कीर्णत्वं तत्र तस्य वाच्यालङ्काररूपता

४. काव्यालङ्कारे २.३४
५. काव्यालङ्कारे २.३६
६. ध्वन्यालोके ३.३६ वृत्तिः
७. तत्रैव ३.३६ वृत्तिः
८. तत्रैव लोचनम् ३.३६ वृत्तिः

भवति। तत्र सा अतिशयोक्तिरिति नाम्नाऽभिधीयते। व्यङ्ग्यत्वेन सङ्कीर्णत्वमपि द्विधा भवति। प्रधानरूपेण, गौणरूपेण वा। यत्र अतिशयोक्तिरूपव्यङ्ग्यस्य सङ्कीर्णत्वं प्राधान्येन भवति तत्र ध्वनिरूपता भवति, यत्र गुणीभावेन सङ्कीर्णत्वं तत्र गुणीभूतव्यङ्ग्यरूपता एव।

अतिशयोक्तिव्यतिरिक्ता अन्यालङ्कारा अपि सन्ति, ये व्यङ्ग्यत्वेनाऽलङ्कारान्तरं पुष्यन्ति, परन्तु तेषामतिशयोक्तिसदृशी सर्वालङ्कारविषयता न सम्भवति, यथा रूपकोपमातुल्योगितानिदर्शनादिषु साम्यमूलकालङ्कारेषु अभिव्यञ्जितं सादृश्यमेव (उपमालङ्कारमेव) शोभातिशयस्य हेतुः। तत्र व्यज्यमाना उपमा रूपकादिसादृश्यमूलक–वाच्यालङ्कारं प्रति गुणीभावं वर्तते। अतो रूपकादिवाच्यालङ्कारा गुणीभूतव्यङ्ग्यस्य विषया भवन्ति। यथोक्तम् –

**यथा रूपकोपमातुल्योगितानिदर्शनादिषु तेषु गम्यमानधर्ममुखेनैव यत्सादृश्यं तदेवं शोभातिशयशालि भवतीति ते सर्वेऽपि चारुत्वातिशयोगिनः सन्तो गुणीभूतव्यङ्ग्यस्यैव विषयाः।** यथा–

**अयं मन्दद्युतिर्भास्वानस्तं प्रतियियासति।**
**उदयः पतनायेति श्रीमतो बोधयन्नरान्।।**[९]

अत्र सूर्यश्रीमत उपमानोपमेयभावो व्यज्यते। अत्र व्यज्यमाना उपमा चमत्कारपर्यवसायिनी न, अपितु चमत्कारस्तु '**क्रियामाध्यमेन सूर्य उपदेशं ददति**', इदं कथनमेवास्तीति। अत्र व्यञ्जितोपमा–उपसर्जनीभूत्वा वाच्यनिदर्शनां पुष्णाति अत एव सा गुणीभूतव्यङ्ग्यस्यैव विषयोऽस्ति।

एवमेव केषाञ्चिदलङ्काराणां परस्परगर्भता भवति यथा दीपकोपमयोः। दीपकालङ्कारस्योपमागर्भता तु प्रसिद्धा, मालोपमायामपि दीपकच्छाया प्रतीयमानतया लक्ष्यते, यथा कालिदासस्य कुमारसम्भवे प्रथमे सर्गे–

**प्रभामहत्या शिखयेव दीपस्त्रिमार्गयेव त्रिदिवस्य मार्गः।**
**संस्कारवत्येव गिरा मनीषी तया स पूतश्च विभूषितश्च।।**[१०]

अत्र चतुर्थपादे कथितयोः 'पूतः', 'विभूषितः' इति क्रियाद्वयोः दीपशिखामन्दाकिनीमनीषिगिरापार्वतीभिश्च सह सम्बधत्वान् मालोपमायां दीपकगर्भता स्फुटमेव, मालोपमां चोत्कर्षयति।

एवमेव गुणीभूतव्यङ्ग्यालङ्काराणामलङ्कारविशेषगर्भता, अलङ्कारमात्र

---

९. ध्वन्यालोके लोचनम् ३.३६ वृत्तिः

१०. ध्वन्यालोके ३.३६ वृत्तिः

गर्भता चापि भवतः। यथा व्याजस्तुतेः प्रेयोऽलङ्कारगर्भता, सन्देहादीनामुपमा–गर्भता दरीदृश्यते।

न केवलमलङ्कारस्य अपितु वस्तुमात्रव्यङ्ग्यांशस्य संस्पर्शोऽपि वाच्यालङ्कारेषु चारुत्वातिशयस्याधानं करोति। यथा समासोक्त्याक्षेपपर्यायोक्ता–दिष्वलङ्कारेषु गम्यमानवस्तुरूपार्थस्य सत्ताया विना तेषां स्वरूपमेव न सिद्ध्यति। तत्र व्यङ्ग्यार्थो गौणो भूत्वा एव वाच्यचमत्कारमुपस्करोति अतएव तेषां गुणीभूतव्यङ्ग्यतायां सन्देहो न–

**'समासोक्त्याक्षेपपर्यायोक्त्यादिषु तु गम्यमानांशाविनाभावेनैव तत्त्वव्यवस्थानाद् गुणीभूतव्यङ्ग्यता निर्विवादैव।'**[११]

वस्तुतो व्यङ्ग्यांशसंस्पर्शमेवालङ्काराणां चारुत्वातिशयत्वस्य कारणम्। व्यङ्ग्यांशविरहिता अलङ्काराः काव्ये नाऽभ्यर्थनीयाः। यतो हि यदि व्यङ्ग्यांशसंस्पर्शेण विनाऽलङ्काराणां सत्तां स्वीकुरुते तर्हि–

**'यथा गौस्तथा गवयः'** इति उपमा,

**'खले वापीयूपः'** इति रूपकम्,

**'द्विर्वचनेऽपि'** इति श्लेषः,

**'यथासङ्ख्यमनुदेशः समानम्'** इति यथासङ्ख्यः,

**'गामश्वं नय'** इति दीपकः,

**'स्थाणुर्वा पुरुषो वास्यात्'** इति सन्देहः,

**'नेदं रजतम्'** इति अपह्नुतिः,

**'पीनो दिवा नात्तीति'** इति पर्यायोक्तिः

**'स्थाध्वोरिच्च'** इति तुल्योगिता,

**'अन्यत्र सञ्ज्ञाविधौ प्रत्ययग्रहणे तदन्तविधिर्न'** इति अप्रस्तुतप्रशंसा,

**'समुद्रः कुण्डिका' 'विन्ध्यो वर्धितवानर्कवर्त्मा गृह्वाद्'**[१२] इति अतिशयोक्तिरलङ्कारो मन्तव्यः। किन्तु चारुत्वहीनतया ते काव्योपयोगिनो न भवन्ति। एवं यत्र व्यङ्ग्यांशस्य सद्भावास्तत्रैवालङ्कारेषु चारुत्वम् अलङ्कारत्वं वा भवति, यत्र व्यङ्ग्यांशस्य सद्भावो न भवति तत्राऽलङ्कारत्वमपि न दृश्यते–इति

---

११. ध्वन्यालोके ३.३६ वृत्तिः

१२. ध्वन्यालोके ३.३६ वृत्तिः

अन्वयव्यतिरेकाभ्यां सिद्ध्यति यदलङ्काराणां सर्वस्वं प्रतीयमानार्थ एव। अलङ्कारेषु प्रतीयामानार्थो वाच्यचारुत्वसम्मुखेऽप्रधानो भवति। अतएव ध्वनिकारो वक्ति–

**तदेवं व्यङ्ग्यांशसंस्पर्शे सति चारुत्वातिशययोगिनो रूपकादयोऽल–ङ्काराः सर्व एव गुणीभूतव्यङ्ग्यस्य मार्गः। गुणीभूतव्यङ्ग्यत्वं च तेषां तथा जातीयानां सर्वेषामेवोक्तानुक्तानां सामान्यम्। तल्लक्षणं सर्व एवैते सुलक्षिता भवन्ति।**[१३]

एवं गुणीभूतव्यङ्ग्यत्वमेवाऽलङ्कारत्वं सामान्यलक्षणमस्ति, तेन लक्षिताः सर्वालङ्काराः सुष्ठु लक्षयन्ति। वाग्विकल्पप्रकारा अनन्ताः, तथाहि अलङ्कारप्रकारा अप्यनन्ताः सम्भवन्ति। तेषां सर्वेषां स्वरूपकथनं प्रतिपदपाठमेव कर्तुं न शक्यते। निष्कर्षतो ध्वनिप्रस्थाने सम्पूर्णवाच्यालङ्कारवर्गो गुणीभूतव्यङ्ग्यकाव्यप्रकारस्येव विषय इति सुस्पष्टम्।

***

१३. ध्वन्यालोके ३.३६ वृत्तिः

**डॉ. उदयकुमारझा**
मधुबनी

# विश्ववन्धुत्वम्

अद्य सम्पूर्णं विश्वं व्यापारिकदृष्ट्या अन्यदृष्ट्या चैकस्मिन् स्थाने स्थापयितुमेका विशेषपरम्परा प्रवृत्ता अस्ति। सम्पूर्णविश्वमेकस्य आपणस्य क्रय्यं वस्तुजातमस्ति, यस्मिन् सम्पूर्णस्य विश्वस्य देशास्तथा च तेषां कम्पनीषु एका प्रतिस्पर्धा जाता अस्ति। इयं नूतनप्रणाली "वैश्वीकरण" (Globelization) शब्देन उच्यते। अद्यतन् विश्वस्मिनस्मिन् शब्दोऽयं व्यापकरूपेण व्यवह्रियते। अस्यां परिस्थितौ विषयेऽस्मिन् संस्कृते वाङ्मये वर्णितविचाराणामन्तर्निहितभावानां कथ्यानाञ्चं सन्दर्भे विचारस्य जिज्ञासा उपस्थिता।

सृष्टिविषये इतिहासकाराणां जीववैज्ञानिकानां तथा च वेदेषु विभिन्न–प्रकारकाणां मतानां समुल्लेखो विद्यते वेदेषु कथितमस्ति, यत् सृष्टिरीश्वरेण कृता विद्यते।

उपर्युक्तकथनेन सिद्ध्यति यदीश्वर एव सृष्टेरुद्देश्येन विभिन्नान् स्वरूपान् धारयामास। अनेन प्रकारेण सर्वेऽपि देशीया विदेशीया वा, एकस्यैव परमात्मनः पुत्राः। तत्र किं कारणं भेदप्रथनम्? यदाऽभेददृष्टिः प्रवर्तते, तदा जगदिदं स्वर्गमिव चकास्ति। न तत्र मोहशोकादेरवसरः, न च तदा विजुगुप्सा विचिकित्सा वा बाधते। एकत्वबुद्धौ न दुःखाग्निलेशोऽपि, क्लेशलवोऽपि च। अतएव यजुर्वेदे ईशोपनिषदि च प्रोच्यते–

**यस्मिन्सर्वाणि भूतान्यात्मैवाभूदविजानतः।**
**तत्र को मोहः कः शोक एकत्वमनुपश्यतः।।**[1]

वेदस्य प्रसङ्गे कथितमस्ति **"वेदोऽखिलो धर्ममूल्"**[2]

इति समुद्घोषयता मनुना समग्रस्यापि वेदनिधेर्धर्माधाररूपेण प्रतिष्ठा विहिता। मानवस्याखिलं कृत्यजातं कर्तव्याकर्तव्यं वा वेदेषु निरूप्यते। अतएव वेदा आचारसंहिता–रूपेण प्रमाणीक्रियन्ते।

**यः कश्चित् कस्यचिद् धर्मो मनुना परिकीर्तितः।**
**स सर्वोऽभिहितो वेदे सर्वज्ञानमयो हि सः।।**[3]

---

१. यजुर्वेदे ४०.६

२. मनुस्मृतौ २.६

३. तदेव २.६

सर्वेऽपि विद्वज्जना, भारतीया दार्शनिका आचारशिक्षणप्रवणाः, स्मृतिकाराः शब्दतत्त्वमीमांसादक्षा, वैयाकरणाः अन्ये च शास्त्रकारा वेदानां परमप्रामाण्यं प्रतिपदमुदघोषयन्ति। विश्वबन्धुत्वस्योपदेश ईशोपनिषिदि उपलभ्यते–

**यस्तु सर्वाणि भूतान्यात्मन्येवानुपश्यति।**
**सर्वभूतेषु चात्मानं, ततो न विजुगुप्सते।**[४]

समाजस्य देशस्य, राष्ट्रस्य च सर्वविधसमुन्नत्यै विचारसाम्यं, मतैक्यं, सामञ्जस्यं चाभीष्टमस्ति–

**समानी व आकूतिः समाना हृदयानि वः।**
**समानमस्तु वो मनो यथा वः सुसहासति।।**[५]

वेदः सम्पूर्णं जगत् ब्रहममयं मन्यते। यतोहि उक्तवान्–

"सर्व ब्रहममयं जगत्"

विश्वबन्धुत्वस्य कामनायाः वेदस्य अनेके मन्त्राः सन्ति। यथा –

**आब्रहमण ब्राह्मणो ब्रहमवर्चसी जायताम्**
**विश्वानि देव सवितुर्दुरितानि परासुव।**
**यद् भद्रं तन्नासुव**[६] **।।**

निखिलेऽपि भुवने पाश्चात्त्याः पौरस्त्याश्च विपश्चितो भारतीयदर्शनानां मुक्तकण्ठेन एकस्वरेण च महत्त्वं स्वीकुर्वन्ति। भारतीयदर्शनानां महत्त्वविषये न कस्यापि विदुषो विप्रतिप्रत्तिः। भारतीयदर्शनेषु विश्वस्य, समाजस्य, संस्कृतेश्च समुत्थापनस्य महती कामना दृश्यते। दर्शनेषु तथाविधानां तत्त्वानां समवायः स्याद् येन वैश्विकी, सामाजिकी, सांस्कृतिकी च समुन्नतिः सम्भाव्येत्। प्राचीनैर्भारतीयै–र्ऋषिभिर्महर्षिभिश्च सततमेवोदीरितं यत् सर्व–भूत–हित–साधनम् असमाकं लक्ष्यम्। तत्र राष्ट्रदेशादिभेदो विपज्जनक एव। यदा स्वार्थबुद्धिर्हीयते तदैव देवत्वं जागर्ति। अस्माकं सम्पूर्ण जीवनदर्शनं विश्वधर्मे सर्वोदयभावनामूलम् आधत्ते। उच्यते यत्–

**सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः।**
**सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग्भवेत्।।**[७]

वेदेषु यज्ञप्रक्रियाया एतदेव महत्त्वं यत् तत्र स्वार्थपरिहारपूर्वकं परार्थ–साधनं शिक्ष्यते। एतदेव यज्ञप्रक्रियायां स्वाहा (स्व–आ हा, स्वार्थस्य सर्वथा त्यागः) इदं न

४. ईशावास्योपनिषदि ६

५. ऋग्वेदे १०.१६१.४

६. यजुर्वेदे ३०.३, २२.२२ ७. सुभाषितम्

मम इत्यादिभिः पदैर्निर्दिश्यते। निजत्वपरत्वभावना तु अल्पधियामेवाभिमता। ते ममेदं परकीयमेतद् इति विभेदमाश्रयन्ते। परं ज्ञानिनस्तत्त्वदर्शिनश्च समत्व–बुद्धिमाश्रित्य जगद्हितचिन्तने सर्वलोक– कल्याणे च प्रवर्तन्ते। अतएव साधूच्यते–

**अयं निजः' परो वेति गणना लघुचेतसाम्।**
**उदारचरितानां तु वसुधैव कुटुम्बकम् ।।**[८]

धार्मिकदृष्ट्या सम्पूर्णविश्वे "सत्यस्य" प्राधान्यं स्वीक्रियते–

**सत्यं सर्वजगन्मूलं जगदाधारकं परम्।**
**सत्यान्नास्ति परं ज्योतिः सत्यं धर्मस्य जीवितम्।।**[९]

सते कल्याणाय हितं सत्यम्। यत् सर्वलोकहितसम्पादने प्रभवति, सर्वस्य च जगतः सुखमावहति, समाजस्य च संरक्षणं विदधाति तत् सत्यम्। यत्र देशकालादिभेदेऽपि न वैपरीत्यं परिवर्त्तनक्षमत्वं वा तत् सत्यमिति। अखिलविश्वे सर्वे धर्मबलं स्वीकुर्वन्ति यत्–

**अधर्मेणैधते तावत् ततो भद्राणि पश्यतिं।**
**ततः सपत्नात् जयति, समूलस्तु विनश्यति।।**[१०]
असत्याश्रयेण तात्कालिकी अल्पकालिका वा समुन्नतिः
सुलभा परं सोन्नतिः ख्यातिर्वा दुःखोदर्का दुःखान्ता च।

सत्यतादृशैव सम्पूर्णविश्वेऽपि अहिंसायाः महत्त्वं दृश्यते। अहिंसायाः जीवनोपयोगित्वम् आश्रित्यैव प्राचीनैः शास्त्रकारैः तस्योपादेयत्वम् उद्घोष्यते। यथा–

**अहिंसा सत्यमस्तेय ब्रहमचर्यमसङ्ग्रहः।**
**शरीराश्रम आस्वाद् सर्वत्र भयवर्जनम्।।**

**सर्वधर्मसमानत्वं स्वदेशी स्पष्टभावना।**
**एकादश सेवावैधर्मत्वे व्रतनिश्चये ।।**[११]

**योऽहिंसकानि भूतानि हिनस्त्यात्मसुखेच्छया।**
**स जीवंश्च मृतश्चैव न क्वचित् सुखतमेधते।।**[१२]

---

८. हितोपदेशे १.६६
९. कपिलस्य
१०. मनुस्मृतौ ४.१७४
११. सर्वोदयसिद्धान्ते
१२. मनुस्मृतौ ५.४५

अहिंसैव स गुणो येन विश्वबन्धुत्वं विश्वप्रेमविश्वहितसाधनं च सम्भाव्यते। अहिंसैव धर्ममार्गः। अहिंसायाः परिपालनार्थमेव भगवान् बुद्धः, भगवान् महावीरः, महर्षिर्दयान्दः, स्वजीवनं समर्पयामासुः। अहिंसा–प्रचारे एवैतेषां जीवनं व्यतीतम्। अहिंसाशस्त्रैणैव महात्मा गाँधिः पराधीनतापाशं संछिद्य भारतवर्षं स्वाधीनतम् अलाम्भयत्। अहिंसाश्रयेणैव महर्षिर्दयानन्दो विषप्रदं ब्राह्मणं जगन्नाथम् अमुञ्चत। अहिंसायुक्त विश्वधर्मभावना विश्वकलयामूला। 'कृण्वन्तो विश्वमार्यम्०'[१३]

इति वदतो वेदस्याप्येतदेवाभिमतम्। सर्वेषां धर्माणां सारभूततत्त्वानां सङ्ग्रहेण विश्वधर्मत्वं सम्भवति। अतएव पतञ्जलिना अहिंसा–सत्यादि–यमानां महत्त्वं वर्णयता प्रोच्यते यद् यमास्ते गुणाः सन्ति ये सर्वधर्मैः स्वीक्रियन्ते। एते सार्वभौमा महाव्रतम्' इति व्यपदिश्यन्ते।

**अहिंसा–सत्यास्तेय–ब्रह्मचर्यापरिग्रहा यमाः।**

**जाति–देश–काल–समयानवच्छिन्नाः सार्वभौमा महाव्रतम्।।**[१४]

इदानीं विश्वबन्धुत्वस्यावश्यकता सर्वथा वर्त्तते। जगदिदं सुख–दुःखात्मकम्। सुखान्तरं दुःखम् । सुखदुःखयोः परिवृत्त्या भुवनमेतद् विपद्यते। नहि लोके कोऽपि दुःखम् कामयते। दुःखनिरोधकस्यैकैवोपायः :– भुवने शान्तेः सदधर्मस्य च संस्थापना।

यदि मानवो मानवं स्वबन्धुत्वदृशा निरीक्षते तर्हि परं शोषणप्रक्रियैव समाप्येत। शोषणस्य मूलं स्वार्थसिद्धिः, स्वसुखावाप्तिकामना च अस्ति। महत्त्वाकाङ्क्षा च मानवं परशोषणे प्रेरयति। यदि परार्थनिष्पादनपूर्वकं स्व–सुख–साधनम् अभिलष्येत् तर्हि न पारस्परिको विवादः कलहः, युद्धं च भावनायाः परित्यागं कृत्वा स्नेहस्य, प्रेमभावनायाः, सहानुभूतेः, सद्भावस्य, ममत्वंस्य च आश्रयः करणीयः। यदाऽनेन प्रकारेण सामाजिकं, राष्ट्रियम्, अन्ताराष्ट्रियं वा कार्यं, भवति, तदा तस्य सुखदः समृद्धिकारी, लोकहितकारी च परिणामः अवश्यमेव भविष्यति। अतो ज्ञायते यद् दुश्चरितं मानवं दानवं विधत्ते। सत्कर्म मानवस्य मानवत्वं पोषयति। परहिताश्रयणं विश्वबन्धुत्वं च मानवं देवत्वं प्रापयति। जीवने देवत्वप्राप्तिकामना स्यात् चेत् तर्हि "वसुधैव कुटुम्बकम्" व्यवहरणीयं च। सर्वदा जगत्कल्याणर्थमाचरणं करणीयम्। यतोहि दुर्गासप्तशत्यां कथितमस्ति :–

**सर्वमङ्गलमाङ्गल्ये शिवे सर्वार्थसाधिके।**

**शरण्ये त्रयम्बके गौरि नारायणि नमोऽस्तु ते।।**

***

१३. ऋग्वेदे ६.६३.५

१४. योगदर्शने २.३१

**प्रो० रामसुमेरयादवः**
लखनऊ

# गङ्गाया धर्मशास्त्रीयं विवेचनं वैज्ञानिकत्वञ्च

गङ्गा सर्वासु नदीषु पवित्रतमा विलसतितराम्। अस्याः पूतेषु तटेषु हरिद्वार–कनखल–काशीत्यादयः प्रसिद्धाः तीर्था अवस्थिता वर्तन्ते। इदं तु सर्वज्ञातमिति सनातनवैदिकधर्मस्य विजयपताकां भगवत्पादाः श्रीशङ्कराचार्याः स्थापयामासुः तैर्भजगोविन्दाख्ये प्रकरणे यमयातनाभ्यस्त्रातुमधोलिखितं पद्यं निष्पादितम्–

**भगवद्गीता किञ्चिदधीता गङ्गाजललवकणिका पीता।**
**सकृदपि येन मुरारिसमर्चा, क्रियते तस्य यमेन न चर्चा।।**

अत्र गङ्गाया लवकणिकापानं गभीरवचनमिति। गङ्गाजलस्वल्पता–ख्यापनप्रवृत्तैरस्य पर्यायद्वयेनाप्यपरितुष्यद्भिः कणशब्देन सह पुनरप्यल्पताद्योतकः कन्प्रत्ययो नियोजितः अर्थाद् गङ्गायाः शीकराणुनापि पीतेनाशुद्धमपि वस्तु झटिति शुद्धं भवति, निसर्गतोऽपवित्रोऽपि प्राणी क्षणमात्रेण पवित्रीभवतिं गङ्गाया महत्त्वे ऋग्वेदे नदीसूक्तं महत्त्वमनुगायति–

**इयं मे गङ्गे यमुने सरस्वती शुतुद्रि स्तोमं सचता परुष्णया।**
**असिक्न्या मरुद्वृधे वितस्तयार्जीकीये श्रृणुहया सुषोमया।।**[1]

तत्र गङ्गायाः प्राथम्येनाह्वानं प्राप्यते–

**अधि बृवुः पणीनां वर्षिष्ठे मूर्धन्नस्थात्। उरुः कक्षो न गाङ्यः।**[2]

शतपथब्राह्मणे[3] ऐतरेयब्राह्मणे च गङ्गायमुनयोः कूले भरतदौष्यन्ते–र्विजयानां यज्ञानाञ्चोल्लेखोऽवाप्यते। महाभारतेऽनुशासनपर्वणि गङ्गाया विस्तरेण पावित्र्यमुपवर्णितम्। तत्रत्यो विंशोऽध्यायो गङ्गाया वर्णनस्य कृते जगति प्रसिद्धा।

---

१. ऋग्वेदे – ११.७५.५
२. ऋग्वेदे – ६.४५.३१
३. शतपथब्राह्णे – १३.५.४.११–१३

**तपसा ब्रह्मचर्येण यज्ञैस्त्यागेन वा पुनः।**
**गतिं तां न लभेज्जन्तुर्गङ्गां संसेव्य यां लभेत्।।**[४]

**वाङ्मनः कर्मजैर्ग्रस्तः पापैरपि पुमानिह।**
**वीक्ष्य गङ्गां भवेत् पूतो अत्र मे नास्ति संशयः।।**[५]

अत्र गङ्गाया दर्शनादेव पूतत्वमवाप्यत इति निश्चयेनोल्लिखितम्। स्कन्दपुराणे काशीखण्डे गङ्गायाः सहस्रसङ्ख्याकानि नामान्युल्लिखितानि।[६] गङ्गां प्रति भौतिकमाध्यात्मिकभावा भारतीयानां मनःसु स्थापिताः। टेलरमहोदयेन "प्रिमिटिव कल्चर" इत्याख्यस्य ग्रन्थस्य द्वितीयसंस्करणे लिखितम्" जिन्हें हम निर्जीव पदार्थ कहते हैं यथा नदियां पत्थर, वृक्ष, अस्त्र शस्त्र आदि वे जीवित बुद्धिशाली हो उठते हैं। उनसे बातें की जाती हैं उन्हें प्रसन्न किया जाता है और यदि वे हानि पहुँचाते हैं तो उन्हें दण्डित भी किया जाता है।[७] गणेश्वरेण गङ्गापत्तलक, मिथिलाभूपतेः पद्मासिंहस्य महिष्या विश्वासदेव्या गङ्गावाक्यावली, गणपतिना गङ्गाभक्तितरङ्गिणी, वर्धमानेन गङ्गाकृत्य–विवेकादयो ग्रन्था विरचिताः, तेषु गङ्गायाः माहात्म्यं विलसितमवलोक्यते। महाभारतस्य वनपर्वणि पञ्शीतितमोऽध्यायो गङ्गायाः कृते चकास्ति। उदाहरणंस्वरूपानि कानिचित् पद्यानि प्रस्तूयन्ते–

**कुरुक्षेत्रसमा गङ्गा यत्र तत्रावगाहिता।**
**विशेषो कनखले प्रयागे परमं महत्।**

तथा च–

**यत्र गङ्गा महाराज सः देशस्तत् तपोवनम्।**
**सिद्धिक्षेत्रं च तज्ज्ञेयं गङ्गातीरसमाश्रितम्।।**[८]

यद् कुत्रचिदपि स्नानं स्यात् गङ्गा कुरुक्षेत्रस्य समा वर्तते, परन्तु कनखलस्य वैशिष्ट्यमधिकतरं विद्यते। प्रयागस्यापि महत्त्वं गङ्गया सम्वर्धितम्। चेत् कोऽपि शतसङ्ख्याकानि पापानि विधायापि गङ्गाजलं सेवते, गङ्गाजलं तस्य दुष्कृत्यान् अग्निवत् प्रज्ज्वालयति। कृतयुगे सर्वाणि स्थलानि पवित्राणि आसन्। त्रेतायुगे पुष्करक्षेत्रं, द्वापरे कुरुक्षेत्रं परन्तु कलियुगे गङ्गैव पवित्रतमा वर्तते।

---

४. ऐतरेयब्राह्मणे – ३६.६
५. महाभारतते–अनुशासनपर्वणि–षड्विंशोध्यायः
६. स्कन्दपुराणे – २६.१५–१६८
७. प्रिमिटिव कल्चर – पृष्ठ १७७
८. महाभारते – वनपर्व – ८५.८८–६७

नामग्रहणादपि पापिनं पवित्रीकरोति। दर्शनादेव सौभाग्यमुपजनयति। स्नानाज्जलस्पर्शमात्रेणापि सप्तवंशानि पवित्रतां यान्ति। यावन् मानवास्थयः गङ्गाजलस्पर्श कुर्वन्ति तावत् स्वर्गलोके वासो भवति। नास्ति गङ्गासमं तीर्थम्, गङ्गातटं तपोवनसदृशं भवति। यत्र गङ्गा प्रवहति तत् सिद्धिक्षेत्रं भवति। महाभारते अनुशासनपर्वणि समागतं यत् ते देशाः तानि जनपदानि, ते पर्वता आश्रमाश्च यतो गङ्गा प्रवहति पुण्यफलप्रदायकाः सन्ति। पापिनां गमनं गङ्गाप्रतिस्थलं तदा परमपदावाप्तिवति। गङ्गास्नानेन पवित्रात्मनो भवन्ति। गङ्गास्नाने यत् पुण्यं प्राप्तुं शक्यते तत् शतयज्ञैरपि नाऽवाप्तुं शक्यते –

**पूर्वे वयसि कर्माणि कृत्वा पापानि ये नराः।**
**पश्चाद् गङ्गां निषेवन्ते तेऽपि यान्त्युत्तमां गतिम्।**

**स्नातानां शुचिभिस्तोयैर्गाङ्गेयैः प्रयतात्मनाम्।**
**व्युष्टिर्भवति या तत् पुंसां क्रतुशतैरपि।।**[९]

श्रीमद्भगवद्गीतायां भगवता योगेश्वरेण श्रीकृष्णेनापि गङ्गाया महत्त्वं प्रतिपादयता निगदितम्– **स्रोतसामस्मि जाह्नवी।**[१०] अर्थात् सर्वस्रोतसां मध्ये गङ्गाऽस्मि इति भगवता कथितम्। गङ्गा भारतस्य प्राणस्वरूपा। गङ्गाराहित्ये तीर्थानां का गतिः। गङ्गा आत्मवत् सञ्जाता। गङ्गा भारतस्य प्रतीकस्वरूपा। सहस्रवर्षपूर्वमपि कृष्णो गङ्गामहत्त्वं व्याहरति। नदीषु गङ्गाऽहम्। गङ्गातो विशाला नद्यः सन्ति। ब्रह्मपुत्रं गङ्गातो विस्तृता लम्बमाना अस्ति, परन्तु गङ्गासमा नैव तिष्ठति। गङ्गाया वैशिष्ट्यमवश्यमेवास्ति यदन्यायाः नद्याः समीपे नास्ति। सर्वासां नदीनां जलं पात्रे संयोजिते दुर्गन्धियुतं भवति गङ्गाजले पूतिः नैवायाति। सर्वं जलमनेन दृष्ट्या पवित्रभक्त्यापूरितं विद्यते। तज्जलमसाधारणं वर्तते। अस्थयोऽपि जले मिलित्वा पञ्चत्त्वेषु सम्मिलन्ति। गङ्गायां खनिजतत्त्वानि मिलन्ति। गङ्गोत्रीतः विराट्धारा आसमुद्रं याति। कापि नदी गङ्गां पतित्वा निजगुणधर्मं परित्यज्य गङ्गाया गुणधर्मं स्वीकरोति। तत्वतो व्यवस्थेमन्यासां नदीनां जलेषु न वर्तते। मनुस्मृतौ साक्षिणां कृते गङ्गास्मरणं सत्योच्चारणाय विहितं तस्मात् प्रतीयते तत्समये गङ्गा कियती पुनीताऽङ्गीकृता–

**यमो वैवस्वतो देवो यस्तवैष हृदि स्थितः।**
**तेन चेद्विवादस्ते मा गङ्गां मा कुरून्गमः।।**[११]

---

९. महाभारते–अनुशासनपर्वणि– २६.३०.३
१०. श्रीमद्भगवद्गीतायाम्– १०.३१
११. मनुस्मृतौ ८.९२

पुराणानि गङ्गां मन्दाकिनीरूपेण स्वर्गे, गङ्गारूपेण वसुन्धरायां, भोगवतीरूपेण पाताले स्वीकुर्वन्ति।[१२] विष्णुपुराणे गङ्गा विष्णो–वामपादस्याङ्गुष्ठान् निर्गताङ्गीकृता–

**वामपादाम्बुजाअङ्गुष्ठनख स्रोतो विनिर्गताम्।**
**विष्णोर्विभर्ति यां भक्त्या शिरसाऽहर्निशं ध्रुवः।**[१३]

मत्स्यपुराणे वर्णनं प्राप्यते यच्छिवेन निजजटाभ्यो गङ्गा सप्तधा प्रवाहिता। यासु तिस्रः – नलिनी ह्लादिनी, पावनी धाराः पूर्वं, तिस्रः–सीता, चक्षुष, सिन्धुधाराः पश्चिमां दिशं प्रवाहिताः तथा च सप्तमी धारा भागीरथीरूपेण लोकान् पुनाति।[१४]

कुर्मपूराणेऽपि–

**तथैवालकनन्दा च दक्षिणादेत्य भारतम्।**
**प्रयाति सागरं भित्वा सप्त भेदा द्विजोत्तमाः।।**[१५]

ब्रह्माण्डपुराणे गङ्गाया महत्त्वविषये प्रोक्तम् –

**स्नानं भक्त्या तु गङ्गायां कर्तुकामस्य गच्छतः।**
**पदे पदेऽश्वमेधस्य फलं मर्त्यस्य जायते।।**[१६]

विष्णुपुराणे गङ्गाप्रशस्तिर्विहिता यस्याः श्रवणमात्रेण पुण्यं प्राप्यते। दर्शनमात्रेण, स्पर्शेन, जलग्रहणेन, अवगाहनेन, नामग्रहणेन स्तुत्या च गङ्गा सर्वान् लोकान् पुनाति –

**श्रुताभिलषिता दृष्टा स्पृष्टा पीतावगाहिता।**
**या पावयति भूतानि कीर्तिता च दिने दिने।**

**गङ्गा गङ्गेति यैर्नाम योजनानां शतैरपि।**
**स्थितैरुच्चारितं हन्ति पापं जन्मतपार्जितम्।।**[१७]

भविष्यपुराणेऽपि गङ्गाया महत्त्वविषये विस्तरेणोपलभ्यते–

---

१२. पद्मपुराणे – ६.२६७.४७
१३. विष्णुपुराणे – २.८.१०६
१४. मत्स्यपुराणे – १२१ . ३८–४१
१५. कूर्मपुराणे – १.४६.३०–३१
१६. ब्रह्माण्डपुराणे – २.१८.३६–४१
१७. विष्णुपुराणे – २.८.१२१ – १२२

**दर्शनात्स्पर्शनात्पानात् तथा गङ्गेति कीर्तनात्।**
**स्मरणादेव गङ्गायाः सद्यः पापैः प्रमुच्यते।**[१८]

मत्स्य–कूर्म–गरुड–पद्मपुराणैर्गङ्गा प्रत्युगमनं सरलमुद्घोषितम्। हरिद्वार–प्रयाग–गङ्गासागरान् प्रत्युपगम्य स्नात्वा जना विगतकल्मषा भवन्ति।

**सर्वत्र सुलभा गङ्गा त्रिषु स्थानेषु दुर्लभा।**
**गङ्गाद्वारे प्रयागे च गङ्गासागरसङ्गमे।**
**तत्र स्नात्वा दिवं यान्ति ये मृतास्तेऽपुनर्भवाः।।**[१९]

नारदीयपुराणे पाठान्तरं विधाय प्राप्यते–

**सर्वत्र दुर्लभा गङ्गा त्रिषु स्थानेषु चाधिका।**
**गङ्गाद्वारे प्रयागे च गङ्गासागरसङ्गमे।**
**तत्र स्नाता दिवं यान्ति ये मृतास्तेऽपुनर्भवाः।।**[२०]

कूर्मपुराणस्य कथनं विद्यते यत् गङ्गा वायुपुराणे उद्घोषिता यत् स्वर्गान्तरिक्षपृथ्वीषु स्थितपञ्चत्रिंशतकोटिस्थानानां तुल्यतां याति। प्रतिनिधित्वञ्च विदधाति–

**तिस्रः कोट्यार्धकोटी च तीर्थानां वायुरब्रवीत्।**
**दिवि भुव्यन्तरिक्षे च तत्सर्वं जाह्नवी स्मृता।।**[२१]

भविष्यपुराणं प्रमाणयति गङ्गाम्–

**नास्ति गङ्गासमं तीर्थं कलिकल्मषनाशकम्।**
**नास्ति मुक्तिप्रदं क्षेत्रं विमुक्तं समं भुवि।।**[२२]

पद्मपुराणे निगदितं वर्तते। बहुव्ययज्ञैः कठिनतपोभिः को लाभो यत्र गङ्गा मूर्तरूपेणोपस्थिता।

---

१८. भविष्यपुराणे – तीर्थचिन्तामणिः पृष्ठ – १६८
१९. मत्स्यपुराणे – १०६.५४
कूर्मपुराणे – १.३७.३४
गरुडपुराणे – ८१.१.२
पद्मपुराणे – ५.६०.१२०
२०. नारदीयपुराणे – ४०.२६–२७
२१. कूर्मपुराणे – १.३६.८
२२. भविष्यपुराणे – गङ्गाज्ञानमहोदधौ / पृष्ठः – ३५

**किं यज्ञैर्बहुवित्ताढ्यैः किं तपोभिः सुदुष्करैः।**
**स्वर्गमोक्षप्रदा गङ्गा सुखसौभाग्यपूजिता।।**[२३]

नारदीयपुराणे अस्या माहात्म्यविषये तारस्वेणोद्घोषितम्

**किमाष्टाङ्गयोगेन किं तपोभिः किमध्वरैः।**
**वास एव हि गङ्गायां सर्वतोऽपि विशिष्यते।**[२४]

सौन्दर्यलहर्यां प्रोक्तं जगद्गुरुणा श्रीमच्छङ्काराचार्यपादैः–

**प्रभाते स्नातीनां नृपतिरमणीनां कुचतटी,**
**गतो यावन्मातर्मिलति तव तोयैर्मृगमदः।**
**मृगास्तावद्वैमानिकशतसहस्रैः परिवृता।**
**विशन्ति स्वच्छन्दं विमलवपुषो नन्दनवनम्।।**[२५]

इत्यस्मिन् पद्ये गङ्गाया महत्त्वं प्रदर्शितम्। प्रभाते स्नातीनां राजसुन्दरीणां कुचतटागतः स्तनप्रान्तलग्नो मृगमदः कस्तूरिका यस्मिन् काले त्वज्जलैर्मिलति, तस्मिन्नेव काले ते मृगाः शतसहस्रैर्विमानैः सञ्चरणशीलैर्देवैः परिवृतो नन्दनवनं विशन्ति। अग्रे–

**"समृद्धं सौभाग्यं सकलवसुधायाः किमपि**
**तन् महैश्वर्यं लीलाजनितजगतः खण्डपरशोः**
**श्रुतीनां सर्वस्वं सकलमथ मूर्तं सुमनसां**
**सुधासौन्दर्यं ते सलिलमशिव नः शमयतु।।**[२६]

गङ्गाजल एतादृशं सामर्थ्यं वर्तते यदखिलं पापनिवहमकल्याणं शमयितुं सामर्थ्यमस्ति।

भवत्या स्नानेन पुण्यं जना लभन्ते। यथा सर्पा तार्क्ष्यदर्शनात् निर्विषा भवन्ति, तथैव गङ्गादर्शनात् साधारणोऽपि जनः पापैः प्रमुच्यते। वापीकूपतडागादिषु स्नानेन यल्लभेत् तत् केवलं गङ्गादर्शनात् प्राप्तुं शक्यते।

मत्स्यपुराणे विस्तरेणोल्लेखः प्राप्यते यत् पापिनां कृते सहस्रयोजनेभ्योऽपि गङ्गास्मरणेन परमं पदमवाप्तुं शक्यते।[२७]

---

२३. पद्मपुराणे – ५.६०.३६
२४. नारदपुराणे – उत्तर ३८.३८
२५. गङ्गालहर्याम् – २६
२६. तत्रैव – १
२७. मत्स्यपुराणे – १०४.१४–१५

नारदीयपुराणे प्रोक्तम् –

**यद्यकार्यशतं कृत्वा कृतं गङ्गाम्बुस्पर्शनं,**
**सर्वान् पापान् दहत्येव तूलराशिमिवानलः।**
**तथैव गङ्गां संस्पृश्य ब्रह्मघ्नाः पुण्यदां शुभां,**
**भवन्ति पूताः ते सर्वे सर्वथैव न संशयः।।**[२८]

वाराहेऽपि एवमेव प्राप्यते –

**ब्रह्मघ्नो गुरुहा गोघ्नः पृष्टो वा सर्वपातकैः।**
**यस्यास्तोयैर्नरः स्पृष्टः सर्वपापैः प्रमुच्यते।।**[२९]

गङ्गया पुनीतानां स्थलानां विस्तरेण व्यवस्था प्राप्यते नारदपुराणे तत्र वर्णनं प्राप्यते। गङ्गातीराद् गव्यूतिपर्यन्तं स्थलं क्षेत्रं कथ्यते। अस्यामेव स्रोतःसीम्नि वासो कर्तव्यः क्षेत्रसीमा द्वयोस्तीरयोर्योजनं यावद् भवति –

**तीराद् गव्यूतिमात्रं तु परितः क्षेत्रमुच्यते।**
**तीरं त्यक्त्वा वसेत् क्षेत्रे तीरे वासो न चेष्यते।।**[३०]

तीर्थचिन्तामणौ स्कन्दपुराणादुद्धृत्य व्याख्या प्राप्यते–

**उभयतटे प्रत्येकं कोशद्वयं क्षेत्रम्।**[३१]

अमरकोशे गव्यूतिः कोशद्वयसमं भवति। गव्यूतिः स्त्रीकोश[३२]–युगम्। स्कन्दपुराणं गङ्गाया महत्त्वं प्रतिपादयन् वर्णयति। गङ्गाया अस्थिप्रवाहस्य परम्परा सम्भवतः सगरस्य पुत्राणां गाथया समुत्पन्ना। सगरस्य पुत्रः कपिलऋषेः क्रोधाद् भस्मीभूता जाताः। भगीरथप्रयत्नेन स्वर्गात् पृथिव्यामानीताया गङ्गाया जलेऽस्थिभस्मानि प्रवाहितानि। कथेयं महाभारतस्य वनपर्वण्यपि प्राप्यते। एतत् कृते सप्ताधिकैकशततमोऽध्यायः पूर्णरूपेण द्रष्टव्यः।[३३]

स्कन्दपुराणे काशीखण्डे वर्णनं प्राप्यते ये जना गङ्गातटेषु स्थित्वाऽपरेषां तीर्थानां प्रशंसां कुर्वन्ति तथा गङ्गायाः प्रशंसायां संलग्ना न भवन्ति ते नरकगामिनो भवन्ति–

---

२८. नारदपुराणे – उत्तर ४३ – ११६
२९. वाराहपुराणे – उत्तर २६ – १३
३०. नारदपुराणे – उत्तर ४३ – १२०
३१. तीर्थचिन्तामणौ – पृष्ठ २६६
३२. अमरकोशे– १–१८
३३. महाभारते वनपर्वणि – १०३

**तीर्थमन्यत् प्रशंसन्ति गङ्गातीरे स्थिताश्च ये।**
**गङ्गां न बहु मन्यन्ते ते स्युर्निरयगामिनः।**[३४]

काशीखण्ड एवं व्यवस्था वर्तते यद् विशिष्टेषु दिवसेषु गङ्गास्नाने पुण्यलाभो भवति। साधारणदिनानामपेक्षयाऽमावस्यायां स्नाने शतगुणितं फलमवाप्यते। सङ्क्रातौ स्नानेन सहस्रगुणितं फलं प्राप्यते। सोमवासरे चन्द्रग्रहणे तथा च रविवासरे सूर्यग्रहणे गङ्गास्नानेनसङ्ख्याफलानि प्राप्तुं शक्यन्ते।

ऋग्वेदेऽपि प्रयागे गङ्गास्नानेन पुण्यनिदर्शनं विहितम्–

**सितासिते सरिते यत् सङ्गते तत्राप्लुतासो दिवमुत्पतन्ति।**
**ये वै तत्त्वं विसृजन्ति धीरास्ते जनासो अमृतत्वं भजन्ते।।**[३५]

रघुवंशेऽपि त्रयोदशसर्गे गङ्गाया वर्णनं विदधता कालिदासेन वर्णितम्–

**"तत्त्वाबोधेन विनापि भूयस्तनुत्यजां नास्ति शरीरबन्धः।**[३६]

अभिहितंस्कन्दपुराणे काशीखण्डे–

**श्रुतिभिः परिपठ्येते सितासिते सरिद्वरे।**
**तत्राप्लुताङ्गा ह्यमृतं भवन्तीह विनिश्चितम्।।**[३७]

महाभारते अनुशासनपर्वण्यपि गङ्गासन्दर्भे प्रयागवर्णनं वर्तते–

**दशतीर्थसहस्राणि तिस्रः कोट्यस्तथा पराः।**
**समागच्छन्ति माघ्यां तु प्रयागे भरतर्षभ।**
**माघमासं प्रयागे तु नियतः संशितव्रतः।**
**स्नात्वा वै तु भरतश्रेष्ठ निर्मलः स्वर्गमवाप्नुयात्।**[३८]

मत्स्यपुराणे

**"दर्शनात्तस्य तीर्थस्य नामसङ्कीर्तनादपि।**
**मृत्तिकालम्भनाद्वापि नरः पापात् प्रमुच्यते।।**[३९]

---

३४. स्कन्दपुराणे – काशीखण्डे – २७.८०
३५. ऋग्वेदं – १०.७५
३६. रघुवंशे – १३.३८
३७. स्कन्दपुराणे – काशीखण्डे – ७.५४
३८. महाभारते अनुशासनपर्व – २५.३६–३८
३९. मत्स्यपुराणे – १०४.१२

तथा सूर्यपुराणे –

**एतत् प्रजायते क्षेत्रं लोकेषु विश्रुतम्।**
**अत्र स्नात्वा दिवं यान्ति ये मृतास्तेऽपुनभवाः।।**[४०]

महाभारते वनपर्वणि गङ्गायाः सन्दर्भमधिकृत्य प्रयागमाहात्म्यमपि समुपलभ्यते–

**गङ्गायमुनयोर्वीसङ्गमं लोकविश्रुतम्।**
**यत्रायजत भूतात्मा पूर्वमेव पितामहः।**
**प्रयागमिति विख्यातं तस्माद् भरतसत्तम।**[४१]

मत्स्यपुराणे –

**तथा सर्वेषु लोकेषु प्रयागं पूजयेद् बुधः।**
**पूज्यते तीर्थराजस्तु सत्यमेव युधिष्ठिर।।**[४२]

प्रयागस्य महिमा गङ्गयैव जाता–त्रिस्थलीसेतुमध्ये प्रयागस्य गौरवगानं प्राप्यते–

**प्रकृष्टं सर्वयागेभ्यः प्रयागमिति गीयते।**
**दृष्ट्वा प्रकृष्टयागेभ्यः पुष्टेभ्यो दक्षिणादिभिः।**
**प्रयागमिति तन्नाम कृतं हरिहरादिभिः।**[४३]

पद्मपुराणे प्रत्येकस्मिन् पद्ये स तीर्थराजो जयति प्रयागः समागतः, यत् प्रयागमाहात्म्यं स्वत एवं प्रस्फुटितम्। मत्स्यपुराणे–

**पञ्चयोजनविस्तीर्णं प्रयागस्य तु मण्डलम्।**
**प्रविष्टमात्रे तद् भूमावश्वमेधः पदे पदे।**[४४]

कूर्मपुराणे प्रयागवर्णनमेवं वर्तते –

**पञ्चयोजनविस्तीर्णं ब्रह्मणः परमेष्ठिनः।**
**प्रयागं प्रथितं तीर्थं यस्य माहात्म्यमीरितम्।।**

---

४०. कूर्मपुराणे– १.३६.२०
४१. महाभारते वनपर्वणि – ८७.१८–१६
४२. मत्स्यपुराणे – १.६.१५
४३. त्रिस्थलीसेतौ पृष्ठ १३
४४. मत्स्यपुराणे – १०८.६–१०

**प्रयागं निवसन्त्येते ब्रह्मविष्णुमहेश्वराः।**
**उत्तरेण प्रतिष्ठानाच्छद्मना ब्रहम तिष्ठति।**
**वेणीमाधवरूपी तु भगवांस्तत्र तिष्ठति।**
**महेश्वरो वटो भूत्वा तिष्ठते परमेश्वरः।**
**ततो देवः सगन्धर्वा सिद्धाश्च परमर्षयः।**
**रक्षन्ति मण्डलं नित्यं पापकर्मनिवारणात्।।**[४५]

एवं गङ्गाया वर्णनविषये समासतो लघुप्रयत्नः कृतः। गङ्गास्नानेन शारीरिकस्वास्थ्यं वरीवर्धते। शरीरे मनसि ऊर्जावाप्यते। रोगमुक्तो भूत्वा मोक्षमवाप्यते। पापराहित्यञ्च भवति। पापराहित्ये मनःसु आत्मविश्वासो जायते। तदा जनाः तया शक्त्या आत्मविश्वासेन कार्याणि सम्पादयन्ति, इदमेव वैज्ञानिकत्वं जगति प्रसिद्धिं गतम्।

***

४५. कूर्मपुराणे – २.३५–४

**डॉ० अभिमन्युसिंहः**
लखनऊ

# मनो रीत्या राजकर्तव्यता

भारतीयैः ऋषिभिर्मानवसमाजहितसाधनाय स्मृतिग्रन्था रचिताः। येन मनुष्यस्य भोगोन्मुखप्रवृत्तिर्नश्येत् स च उचितरीत्या धर्मार्थकामान् जुषन् अन्ते मोक्षमाप्नुयात्। स्मृतिग्रन्थानामेका दीर्घपरम्परा प्राप्यते यस्याम्मनुना, याज्ञवल्क्येन, पराशरेण रचिताः स्मृतिग्रन्था बहुप्रसिद्धा जाताः।

मनुस्मृतौ मानवजीवनोपयोगिनः सर्वेऽपि विषयाः समाविष्टा वर्तन्ते। मनुस्मृतिर्नृपस्याचारं परमसाफल्यञ्च वर्णयति। शास्त्रविधिनोपनीतः क्षत्रियोऽभिषिक्तनृपः समग्रमपि चराचरं रक्षेत्। नृपाऽभावे सर्वत्राऽव्यवस्था प्रसरति।

मनुस्मृतौ यद्यपि विविधविषयाः वर्णिताः तथापि राजधर्मो बाहुल्येन प्रतिपादितः। 'धर्म' शब्दस्य तात्पर्यमस्ति– कर्तव्यतावाचनम्। अस्मिन् प्रसङ्गे नृपस्य करणीयकर्मप्रतिज्ञाऽभिधीयते।

अराजकेऽस्मिन् लोके भयमेव सर्वतो विद्यते। अस्य लोकस्य रक्षार्थं प्रभूः राजानमसृजत्। मनोः समये धारणाऽऽसीत्–

**इन्द्रानिलयमाऽर्काणामग्नेश्च वरूणस्य च।**
**चन्द्रवित्तेशयोश्चैव मात्रा निर्हृत्य शाश्वतीः।।**[१]

समाजस्य व्यवस्था सुचारुरूपेण चालितुं कोऽपि नियन्त्रक आवश्यकोऽस्ति येन सत्यं, विनयं इन्द्रियसंयमः शीलता क्षमा शरणागतस्य रक्षा, प्रियभाषणम्, सत्सङ्गतिः उद्योगशीलता इत्यादयोऽनेके गुणा आवश्यकाः सन्ति। एतेभ्यः सम्पन्ना मनुष्या एव राजधर्मस्य निर्वहणं कर्तुं शक्नुवन्ति।

समाजस्य मर्यादां स्थापयितुम्–

**यथा हि रश्मयोऽश्वस्य द्विरदस्याङ्कुशो यथा।**
**नरेन्द्रधर्मो लोकस्य तथा प्रग्रहणं स्मृतम्।।**[२]

यथा अश्वं नियन्त्रयितुं रश्मयो आवश्यका द्विरदस्य अङ्कुश आवश्यकोऽस्ति

---

१. मनुस्मृतौ ७.०४

२. महाभारते, शान्तिपर्वणि ५६.०५

तथैव लोकस्य प्रग्रहणाय राजधर्मो आवश्यकोऽस्ति।

राज्ञः प्रमुखं कर्त्तव्यं प्रजारक्षणमस्ति, एतस्य रक्षा राज्ञा बाह्यैराक्रमणैरन्तः विपत्तिभिश्च करणीयो यतः–

**तस्याऽर्थे सर्वभूतानां गोप्तारं धर्ममात्मजम्।**
**ब्रह्मतेजोमयं दण्डमसृजत् पूर्वमीश्वरः।।**[३]

ईश्वरो नृपं सर्वभूतानां गोप्तारं धर्मात्मनं सफलं कर्तु ब्रह्मतेजोमयं दण्डमसृजत्। पूर्वमेवैषः राजा प्रजाः स्ववश एव कर्तुं समर्थोऽभूत्–

**इन्द्रियाणां जये योगं समातिष्ठेद् दिवानिशम्।**
**जितेन्द्रियो हि शक्नोति वशे स्थापयितुं प्रजाः।।**[४]

दिवानिशम् इन्द्रियाणां जये समातिष्ठेद् राजा यतो जितेन्द्रियो प्रजा वशे स्थापयितुं शक्नोति। एतन् नृपस्य प्रधानकर्तव्यमस्ति।

**तद्राज्ये राज्यकामानां नान्यो धर्मः सनातनः।**
**ऋते रक्षां तु विस्पष्टं रक्षा लोकस्य धारिणी।।**[५]

प्रजानां कल्याणाय कामसमुत्थानि दश क्रोधजानि चाष्टव्यसनानि त्यक्तुं स यत्नवान् भवेत्–

**दश कामसमुत्थानि तथाऽष्टौ क्रोधजानि च।**
**व्यसनानि दुरन्तानि प्रयत्नेन विवर्जयेत्।।**[६]

इत्थमनेकराजकर्त्तव्यानि बोधितानि सन्ति। एवमेव याज्ञवल्क्यस्मृतावपि अनेके राजनियमा नीतिरूपेण कथिताः सन्ति। सर्वेऽपि स्मृतिकाराः पूर्वं राज्ञ एक–धर्मान् बोधयन्ति। महर्षिर्याज्ञवल्क्योऽपि तथैवाचाराध्याये राज्ञ एव प्रथमं कर्त्तव्यकर्माणि बोधयति–

**"महोत्साहः स्थूललक्षः कृतज्ञो वृद्धसेवकः।**
**विनीतः सत्त्वसम्पन्नः कुलीनः सत्यवाक् शुचिः।।**

**स्वरन्ध्रगोप्ताऽऽन्वीक्षिक्यां दण्डनीत्यां तथैव च।**

---

३. मनुस्मृतौ ७.१४

४. तत्रैव ७.४४

५. तत्रैव ५७.४२

६. तत्रैव ७.४५

**विनीतस्त्वथ वार्तायां त्रय्यां चैव नराधिपः।।**

**अलब्धमीहेदं धर्मेण लब्धं यत्नेन पालयेत्।**
**पालितं वर्धयेन्नित्यं वृद्धं पात्रेषु निक्षिपेत्।।**[७]

प्रजानां सन्तोषं कर्तुं समर्थो राजा सत्यवादी धर्मात्मा च भवतु नाम–

**धर्मात्मा सत्यावाक् चैव राजा रञ्जयति प्रजाम्।।**[८]

बाल्मीकिरामायणे नारदोऽपि राज्ञः गुणान् रामे निधाय वदति–

**इक्ष्वाकुवंशप्रभवो रामो नाम जनैः श्रुतः।**
**नियतात्मा महावीर्यो श्रुतिमान् धृतिमान् वशी।।**

**सर्वशास्त्रार्थतत्त्वज्ञः स्मृतिमान् प्रतिभानवान्।**
**सर्वलोकप्रियः साधुरदीनात्मा विचक्षणः।।**

वसन्तर्तुर्भानुरिव राजा सर्वसुखाकरः स्यात्

**तस्मान्नैव मृदुर्नित्यं तीक्ष्णो नैव भवेन्नृपः।**
**वासन्तार्क इव श्रीमान् न शीतो न च घर्मदः।।**[९]

यथा वसन्तभानुः न मृदुर्न तीक्ष्णो भवति तथैव नृपः सदैव प्रजाकल्याणाय तत्परो भवेत्।

विशिष्टरूपेण राजनीतेश्चर्चा दशरथवर्णनप्रसङ्ग आदिकविरुपस्थापयति यद् राज्ञो दशरथस्य राजनीतिरतीव प्रभावकारिणी वेदबोधिता चासीत्। पूर्वं मनुस्मृतौ याज्ञवल्क्यस्मृतौ वर्णिताः गुणाः दशरथे महर्षिणा दर्शिताः–

**तस्यां पुर्यामयोध्यायां वेदवित् सर्वसङ्ग्रहः।**
**दीर्घदर्शी महातेजाः पौरजानपदप्रियः।**

**यथा मनुर्महातेजा लोकस्य परिरक्षिता।**
**तथा दशरथो राजा लोकस्य परिरक्षिता।।**[१०]

एवमेव गुणा वर्णिताः सन्ति।

---

७. मनुस्मृतौ, १. ३०६, ३१४, ३१७

८. महाभारते शान्तिपर्वणि, ५६.३६

९. तदेव, ५६.४०

१०. वाल्मीकिरामायणे १.६.१–४

विद्वान् कुशलश्च अमात्यो राज्यस्य व्यवस्थां सुदृढीकर्तुं समर्थो भवितुमर्हति–

**तेषामर्थे नियुञ्जीत शूरान् दक्षान् कुलोद्गतान्।**
**शुचीनाकरकर्मान्ते भीरूनन्तनिवेशने।।**[११]

राज्ञे विनयगुणस्यावश्यकतास्ति यथोक्तम्–

**बहवोऽविनयान्नष्टा राजानः सपरिच्छदाः।**
**वनस्था अपि राज्यानि विनयात् प्रतिपेदिरे।।**[१२]

अरण्ये निवसन्तोऽपि बहवो राजानः विनयकारणेन राज्यं प्राप्तवन्तः, अथ च बहवोऽविनयाद् विनष्टाः।

इत्थं यथा मनुः प्रतिपादयति स्म तथा च महर्षिणा व्यासेन तस्याऽनुगतिं कृत्वा शान्तिपर्वणि भीष्मेण उपदिष्टं तदेतद् राजकर्तव्यतायाः सर्वस्वं स्वीकर्तुं शक्यते। प्राचीनकाले राजानो निरङ्कुशा नाऽभवन् वरं च धर्मः तेषां ऋषिप्रोक्तः अङ्कुशः अभवत् चेद् अद्यतनीना मतदानैश्चिताः नेतारो धर्मशास्त्रानुगतमाचारं चरन्ति तदैव लोकतन्त्रमिदं सफलं भूयात्।

***

११. मनुस्मृतौ ७.६२

१२. तत्रैव ७.४०

**डॉ. प्रयागनारायणमिश्रः**
लखनऊ

# गुरुतत्त्वञ्च धीमहि

भारतीयधर्मशास्त्रस्याऽतिव्यापृतसुदीर्घाऽविरलपरम्परायामाचार्योपाध्यायाऽध्यापकादिभिरनेकाभिस्सञ्ज्ञाभिरलङ्कृतस्य शिक्षकस्य गुरुरित्यभिधानमपि प्रचुरतया लोके प्रथितम्। गुरुरयस्वकीयैरप्रतिम गौरववशादेव विविधैर्नामभिरलङ्क्रियते। सामान्यतयाऽद्य शिक्षकरूपेण यन्नामपदं दृष्टिपथमुपयाति तस्याद्यं ब्यावहारिकं दर्शनं ऋग्वेदीये मण्डूकसूक्ते कर्तुं शक्यते यत्रोक्तं हे मण्डूका युष्माकम्मध्ये एको मण्डूकोऽन्यस्य मण्डूकस्य वाचं तथैवानुवदति यथा कोऽपि शिष्यः शक्तिमतः शिक्षकस्य वाचमनुकरोति –

**यदेषामन्यो अन्यस्य वाचं शाक्तस्येव वदति शिक्षमाणः।**[1]

अत्रैतस्मिन् मन्त्रे शिक्ष्यमाणं शिष्यं कोऽपि समर्थः शिक्षक एवोपदेष्टुं पारयति, यथाऽवोचि भाष्यकृताऽऽचार्येण सायणेन

**'शक्तिमतः शिक्षकस्य वाचं यथानुवदति तद्वत्।**[2]

यद्यपि शिक्षकशब्दस्याऽत्र स्फुटः प्रयोगो न दरीदृश्यते तथापि लोकप्रथितिमाश्रित्य मन्त्रेऽस्मिन् शिक्षकस्य मूलमन्वेष्टुं सायणभाष्य–मधिकृत्यैवन्निगदितम्। शिक्ष्–धातोर्णिच् कृत्वा ण्वुल्–प्रत्यय–योगेन निष्पन्नोऽयमेव शिक्षकशब्दः समाजे प्रचुरतया शिक्षकस्य शक्तिमुद्दायित्वमुन्मीलयति। वैदिकवाङ्मये शिक्षकस्य पर्यायरूपेणैवोपर्युक्ता आचार्योपाध्यायाऽध्यापकादि–विविधशब्दा दृष्टिपथमुपयान्ति। किन्तु नैके धर्मशास्त्रीया आचार्याः पृथक्–पृथक्त–याऽप्येतेषां स्वरूपं निरूपयन्ति, यथा मनुनाऽऽचार्यलक्षणं कुर्वताऽवोचि–

**उपनीय तु यः शिष्यं वेदमध्यापयेद् द्विजः।**
**सकल्पं सरहस्यं च तमाचार्यं प्रचक्षते।।**[3]

यतोहि केनचिदन्येनाऽऽचार्येणोक्तं यद्यो यमैः सन्नियमैर्युतो भूत्वा स्वयमाचारपूर्वकं विविधानि शास्त्राणि विचिन्त्य शिष्येषु शास्त्रान् आचारांश्च

---

१. ऋग्वेदे ७.१३७.५

२. तत्रैव सायणभाष्ये

३. मनुस्मृतौ २.१४०

स्थापयति स आचार्यो भवति–

**स्वयमाचरते यस्माद् आचारं स्थापयत्यपि।**
**आचिनोति च शास्त्रार्थान् यमैः सन्नियमैर्युतिः।।**[४]

एवमेवाऽद्वैततापोनिषद्याचार्यपदस्य निर्वचनं कृतम्–

**आचिनोति हि शास्त्रार्थानाचारस्थापनादपि।**
**स्वयमाचरते यस्तु तस्मादाचार्य उच्यते।।**[५]

आचार्यपदस्योपर्युक्तः सम्पूर्णोऽप्यर्थ आचार्यपदनिर्वचनप्रसङ्गे निरुक्ते सम्यक्तया द्रष्टव्यः

**'आचार्य आचारं ग्राहयति, आचिनोत्यर्थान्, आचिनोति बुद्धिमित वा।**[६]

आचार्यलक्षणप्रवचनाऽनन्तरं मनुस्मृतौ येन रूपेण उपाध्यायस्य लक्षणन्निरूपितं तेनाऽवगम्यते यद् वेदाङ्गेन सार्द्धं वेदस्यैकदेशस्य शिक्षणं यो जीविकार्थं करोति स उपाध्यायो भवति–

**एकदेशं तु वेदस्य वेदाङ्गान्यपि वा पुनः।**
**योऽध्यापयति वृत्यर्थमुपाध्यायः स उच्यते।।**[७]

अनेनाऽवगम्यते यदुपाध्याय उपशिक्षको भवति। उपेत्याधीयतेऽस्मा–दित्युपाध्य इति निर्वचनेन वेदस्यांऽशविशेषस्य पारिश्रमिकोऽध्यापको गौणशिक्षकरूपेणाङ्गीकर्तुं शक्यते। आचार्योपाध्यायव्यतिरक्तं महनीयं यन्नामपदं शिक्षकेभ्यः प्रयुज्यते तदस्ति गुरुनामधेयम्। मनुना येन रूपेण गुरुपदं परिभाष्यते तेन कोऽपि पृथगेवाऽर्थः प्रतीयते पितृरूपः–

**निषेकादीनि कर्माणि यः करोति यथाविधि।**
**सम्भावयति चान्नेन स विप्रो गुरुरुच्यते।।**[८]

पितृरूपोऽप्ययमर्थः पितृरूपत्वं परिभाषयति गुरोर्यतः स्वयमेवोक्तं मनुना यदायुषश्चतुर्थभागो गुरोराश्रमे वेदवेदाङ्गाध्ययने निर्वापनीयः, तदनन्तरमेव स गृहस्थाश्रमं निविशेत्–

---

४. निरुक्ते १.४ दुर्गाचार्यवृत्तौ
५. अद्वयतापोपनिषदि – ३
६. निरुक्ते १.४
७. मनुस्मृतौ २.१४१
८. तत्रैव १.१४२

**चतुर्थमायुषं भागमुषित्वाऽऽद्यं गुरौ द्विजः।**
**द्वितीयमायुषं भागं कृतदारो गृहे वसेत्।।**

**गुरुणाऽनुमतः स्नात्वा समावृत्तो यथाविधि।**
**उद्वहेद् द्विजो भार्यां सवर्णां लक्षणान्विताम्।।**[९]

अतो निश्चप्रचमेव मनुनोक्तमिदं गुरोर्लक्षणं गुरोः पितृतुल्यत्वं संसूचयति यतोहि वेदाऽध्ययनाऽनन्तरमेव गृहस्थाश्रमप्रवेशो विहितः, इदं वेदाऽध्ययनं गुरुचरणाश्रितमेव भवति, अत एवोक्तं मनुस्मृतौ–

**षट्त्रिंशदाब्दिकं चर्यं गुरौ त्रैवेदिकं व्रतम्।**
**तदधिकं पादिकं वा ग्रहणान्तिकमेव वा।**

**वेदानधीत्य वेदौ वा वेदो वाऽपि यथाक्रमम्।**
**अविलुप्तब्रह्मचर्यो गृहस्थाश्रममावसेत्।।**[१०]

वस्तुतस्तु स्नातकास्त्रयो भवन्ति विद्यास्नातको व्रतस्नातको विद्याव्रतस्नातकश्च। त्रयोऽपि स्नातका विद्याऽध्ययनं सम्पाद्य समावर्तनसंस्कार–पूर्वकं गुरुणाऽनुमता एव गृहस्थाश्रमप्रवेशार्हा भवन्ति। अतो गृहस्थाश्रम–प्रवेशाऽनुमतिप्रदातृत्वादथ च शिष्याणामध्यापनसंरक्षणार्थादिसम्पादनत्वाद् गुरोः पितृत्वे नाऽस्ति शङ्काया लेशमात्रमपि, अत एवोक्तं संहितोपनिषद्ब्राह्मणे

**य आतृणवत्यवितथेन कर्णावदुःखं कुर्वन् श्रुतं सम्प्रयच्छन्।**
**तं मन्येत् पितरं मातरञ्च तस्मै न द्रुह्येत् कतमच्चनाह।।**[११]

मनुस्मृतावपि मतमिदमधोलिखितेन श्लोकेनाङ्ङ्गीकृतम्–

**य आवृणोत्यवितथं ब्रह्मणा श्रवणावुभौ।**
**स माता स पिता ज्ञेयस्तं न द्रुहयेत्कदाचन।।**[१२]

अतोऽध्यापकं गुरुन्न केवलं मातृपितृवदङ्गीकरणमुपदिष्टमपितु गुरुपदं परिभाषमाणायां मनुस्मृतौ स्पष्टतयोक्तं यद्येनाऽपि जनेन येन केन प्रकारेणाऽपि श्रुतोपदेशो ज्ञानोपदेशो वा क्रियते तमपीह गुरुं विद्यात्–

---

९. तदेव ४.१ तथा ३.४

१०. तदेव ३.१२

११. संहितोपनिषद्ब्राह्मणे – ३

१२. मनुस्मृतौ २.१४४

**अल्पं वा बहु वा यस्य श्रुतस्योपकरोति यः।**
**तमपीह गुरुं विद्याच्छ्रुतोपक्रियया तया।।**[१३]

अतो गुरुस्साक्षात् पितृस्वरूपो भूत्वा शिष्यं सर्वथा नवीनं विलक्षणं संस्कृतञ्च स्वरूपं प्रापयति यथोक्तमत्र मनुस्मृतौ–

**आचार्यस्त्वस्य यां जातिं विधिवद् वेदपारगः।**
**उत्पादयति सावित्र्या सा सत्या साऽजराऽमरा।।**[१४]

अत एव गुरोरपि शिक्षकत्वमध्यापकत्वञ्च सर्वथोपपन्नम्। एतस्मादेवानेकैर्विद्वद्भिरप्रतिमरूपेण गुरुपदमपि बहुधा परिभाषितं जातमाचार्योपाध्यायवदेव, यथोक्तम्–

**उपनीय तु यः शिष्यं महाव्याहृतिपूर्वकम्।**
**वेदमध्यापयेदेनं शौचाचारांश्च शिक्षयेत्।।**[१५]

याज्ञवल्क्येनाऽपि गुरोःस्वरूपमवेवमेवाऽवोचि, यथा

**स गुरुर्यः क्रियाः कृत्वा वेदमस्मै प्रयच्छति।।**[१६]

अतो निश्चप्रचमेव वक्तुमिदं शक्यते यद् गुरुर्न केवलं मातृपित्रास्पदो भवति, अपितु स तूपनयनादिसंस्कारपूर्वकमखिलमपि मानसिकं संस्कारं कृत्वा शिष्याय नवीनं नामस्वरूपादिकं प्रयच्छति अतएव

**'उत्पादकब्रहमदात्रोर्गरीयान् ब्रहमदः पिता'**[१७]

इत्युक्त्वा गुरोर्महत्त्वमेवोक्तम्।

विष्णुधर्मसूत्रे गुरोरेतस्मादेव वैशिष्ट्यात्

**'त्रयः पुरुषस्य अति गुरवो भवन्ति। पिता माताचार्यश्च।'**[१८] इत्युक्त्वा गुरोर्महत्त्वमुपस्थापितम्।

उपर्युक्तविवेचनेन सङ्क्षेपेण सारतत्त्वोपस्थापनं कर्तुं वक्तुं शक्यते यदाचार्योपाध्यायाऽध्यापकशिक्षकादिसमस्तपदवाच्यं गुरुपदमस्ति निश्चप्रचमेव

---

१३. तदेव २.१४६, चाणक्यनीतौ १३.१८
१४. मनुस्मृतौ २.१४८
१५. पारस्करगृह्यसूत्रे २.५.४४ हरिहरभाष्ये
१६. याज्ञवल्क्यस्मृतौ १.३४
१७. मनुस्मृतौ २.१४६
१८. विष्णुधर्मसूत्रे ३२.१–२

गुरुतममतीवगौरवास्पदं पदं यत् प्रायो लौकिकाऽलकौकिकाध्यात्मिकगुरुरूपेण गुरुत्रयं परिभाषयति। एतस्मादेव मनुः सर्वप्रथमं गुरुमभिवादयितुं निर्दिशति–

**लौकिकं वैदिकं वाऽपि तथाऽऽध्यात्मिकमेव च।**
**आददीत ततो ज्ञानं तं पूर्वमभिवादयेत्।।**[१९]

अत एवं गुरुतत्त्वमिदमस्ति विचारणीयं सम्प्रति। अखिलसिद्धि–प्रदमिदम्मोक्षमूलं गुरुतत्त्वमाध्यात्मिकदृशा विविच्यते–

गृ–निगरणे शब्दे चाऽथवा गुङ्–अब्यक्ते शब्दे वा धातौ रुशब्देऽथवा कृ–योगेन निष्पन्नोऽयं गुरुः शब्दः स्वगौरवमहिम्ना सर्वैरेवाऽऽध्यात्मिक–गुरुरुपेणाऽथवा धार्मिकगुरुरूपेण प्रयुज्याऽपि पदे–पदे शिक्षकत्वमुद्वहति लोकोपकारकत्वं पदमार्थसाधकत्वञ्च। अतो गुरुशब्दे प्रयुक्तं वर्णद्वयं विविधरूपेणाऽधिकृत्य विद्वद्भिर्गुरुशब्दस्य निर्वचनं व्युत्पत्तिर्वा उच्यते यथा प्रोक्तमद्वयतारकोपनिषदि –

**गुशब्दस्त्वन्धकारस्स्याद् रु–शब्दस्तन्निरोधकः।**
**अन्धकारनिरोधत्वाद् गुरुरित्यभिधीयते।।**[२०]

इदमेव मतमन्यत्राऽपि केनचिदाचार्येणाऽभिप्रायप्रकाशनपूर्वकं प्रस्तूयैव–न्निगदितम्–

**गुकारस्त्वन्धकारश्च रुकारस्तेज उच्यते।**
**अज्ञानग्रासकं ब्रह्म गुरुरेव न संशयः।।**

**गुकारः प्रथमो वर्णो मायादिगुणभासकः।**
**रुकारो द्वितीयो ब्रह्म मायाभ्रान्तिविनाशनम्।।**[२१]

एतस्मादेव गुरुर्मायाऽज्ञानविनाशिकयाद्भुतशक्त्या अज्ञानतिमिरं विवास्य ब्रह्मसाक्षात्कारं कर्तुमर्होऽस्ति केवलम्। मायाभ्रान्तिरूपमज्ञानान्धकारविनाशकोऽयं गुरुः सर्वप्रकारमपि मौर्ख्यमोहान्धमूलं विनाश्य सर्वातीतं परमानन्दं जनयति, अतएव गुरुस्तुतौ प्रोक्तम्

**अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया।**
**चक्षुरुन्मीलितं येन तस्मै श्री गुरवे नमः।।**

**अखण्डमण्डलाकारं व्याप्तं येन चराचरम्।**
**तद्पदं दर्शितं येन तस्मै श्रीगुरवे नमः।।**[२२]

१९. मनुस्मृतौ २.११७

२०. अद्वयतापोपनिषदि १.५

२१. श्रीगुरुगीतायाम् २३ तथा २४

२२. पाणिनीयशिक्षायाम्–५६, शिववार्तिकेऽपि

येन सच्चिदानन्दस्वरूपेण परब्रह्मणाऽखिलमिदं ब्रह्माण्डं चराचरञ्जगद् व्याप्तं जातं तस्याऽनुभूतिर्गुरुरेव कारयितुं शक्नोति। अत एवोक्तं श्रीगुरुगीतायां–स्कन्दपुराणे

**गुकारं च गुणातीतं रुकारं रूपवर्जितम्।**
**गुणातीतं स्वरूपं च यो दद्यात् स गुरुस्स्मृतः।।**[२३]

वस्तुतो ज्ञानादधिकं किमपि तत्वं नाऽस्ति। ज्ञानमूलं गुरुरेव, यतो हि गुरुस्मरणमात्रेणैवेदृशं ज्ञानं स्वयमेवाऽऽयाति येन सर्वसम्प्राप्तिरपि सम्भाव्यते अत एवोक्तम्–

**ध्यानमूलं गुरोर्मूर्त्तिः पूजामूलं गुरोः पदम्।**
**मन्त्रमूलं गुरोर्वक्यं मोक्षमूलं गुरोः कृपा।।**[२४]

धार्मिकाऽऽध्यात्मिकदार्शनिकरूपेण यद् गुरोः परतरं नाऽस्ति किमपि तत्त्वं, यतो हि स्वचित्ते गुरोर्ध्यानं कृत्वा शिष्यों ब्रह्मण्यो भूत्वा मुक्तो भवति नास्त्यत्र सन्देहस्य लवोऽपि यथोक्तम्–

**गुरुध्यानं तथा कृत्वा स्वयं ब्रह्ममयो भवेत्।**
**पिण्डे पदे तथा रूपे मुक्तोऽसौ नात्र संशयः।।**[२५]

यदि कोऽप्यध्यात्मज्ञानमधिगन्तुं वाञ्छन्ति चेत्तर्हि गुरुशरणमेवाऽस्ति मात्रमेकं साधनं यथोक्तं श्रीमद्भगवद्गीतायाम्–

**तद् विद्धि प्रणिपातेन परिप्रश्नेन सेवया।**
**उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः।।**[२६]

एतत् सर्वं तत्त्वदर्शिप्रवरं गुरुदेवमाश्रित्यैवाप्यते तदैवोक्तमेकत्र स्कन्दपुराणे–

**न शास्त्रात् प्राप्यते ज्ञानं न तु तर्कवितर्कनात्।**
**प्राप्यतेऽध्यात्मज्ञानं तु केवलं गुरुसेवनात्।।**[२७]

अतः साक्षात् परब्रह्मस्वरूपो गुरुर्मनसा वाचा कर्मणा एकनिष्ठभावेनो–पास्योऽस्ति, यतो हि यदि ईश्वरश्चेद्रुष्टो भवति कदाचित् तर्हि रक्षकत्वेन गुरुर्विद्यत

---

२३. श्रीगुरुगीतायाम्–४६
२४. तदेव – ७६
२५. तदेव – ११६
२६. श्रीमद्भगवद्गीतायाम् ४.३४
२७. श्रीगुरुगीतायाम्–१, भूमिकांशे

एव किन्तु यदि गुरू रुष्टो जायते तदा कोऽपि सहायको भवितुं नार्हति, अतएव तस्यैकं शरणं व्रज इत्युक्त्वाऽपि मन्ये गुरुशरणमेवोपदिश्यते–

**हरौ रुष्टे गुरुस्त्राता गुरौ रुष्टे न कश्चन।**
**तस्मात् सर्वप्रयत्नेन श्रीगुरुं शरणं व्रजेत्।।**[२८]

एकेनाऽन्येन श्लोकेनाऽवगम्यते यद् यत्र गुरुः समाद्रियते सम्यग्रूपेण तत्र देवा अपि सहायका भूत्वा सर्वाभीष्टसाधनमुपस्थापयन्ति–

**देवाः कुर्वन्ति साहाय्यं गुरुर्यत्र प्रणम्यते।**
**जघानेन्द्रसहायोऽरीनभ्यावर्ती गुरोर्नते।।**[२९]

देवासाहाय्यप्रकरणमुद्धृत्याऽत्र लौकिकेषु ज्ञानविज्ञानेषु गुरोरवदान–मभिकल्पनीयम्। आध्यात्मिकगुरुवदेव लौकिकोऽपि गुरुः शिक्षकोऽध्यापको वा आचार्योपाध्यायश्चाऽपि मनसा वाचा कर्मणा वाऽपि सर्वथा सेव्यः समादरणीयः श्रद्धेयः पूज्यश्च भवति। यतोहि यथा गुरुराध्यात्मिकज्ञानमूलत्वं वहति तथैव गुरुणा विना कीदृशमपि कल्याणप्रदं सफलं ज्ञानं भवितुं नार्हति। यथा कोऽपि जनः खननकर्मणि निरन्तरं जलप्राप्तिपर्यन्तं संरतो भूत्वा भूगतं वारि प्राप्नोति तथैव केवलं शुश्रूषुरेव गुरुगतां विद्यामधिगन्तुं शक्यते–

**यथा खननखनित्रेण नरो वार्यधिगच्छति।**
**तथा गुरुगतां विद्यां शुश्रूषुरधिगच्छति।।**[३०]

किमधिकं संहितोपनिषद्ब्राहमणे प्रोक्तं यद् ये शिष्या मनसा वाचा कर्मणा वा गुरुं नाद्रियन्ते तान् तदधीतं शास्त्रं श्रुतं वा न भुनक्ति अर्थात् सेवारहितं ज्ञानं यदि कदाचित् प्राप्तमपि स्यात् तदाऽपि सफलतां नोपयाति–

**अध्याऽपिता ये गुरुं नाऽद्रियन्ते विप्रा वाचा मनसा कर्मणा वा।**
**यथैव ते न गुरोर्भोजनीयास्तथैव तान् न भुनक्ति श्रुतं तत्।।**[३१]

याज्ञवल्क्यशिक्षायान्तु स्पष्टतयोक्तं यद् मेधागुणैः संयुक्तस्याऽपि विद्या यदि गुरुसेवां विना प्राप्यते चेत् सा कथमपि वन्ध्या युवतीव यशोभाजनं भवितुं न शक्यते–

---

२८. तदेव – ७६

२९. कल्याणे वेदकथाक्ङ्के पृ. २८०

३०. याज्ञवल्क्यशिक्षायाम् १६७ चाणक्यनीतौ १३.१६

३१. संहितोपनिषद्ब्राह्मणे – ३

**शुश्रूषारहिता विद्या अपि मेधागुणैर्युता।**
**वन्ध्येव युवती तस्य न विद्या फलिनी भवेत्।।**[३२]

गुरून् प्रति सेवाश्रद्धादरादिविषये धर्मशास्त्रीयग्रन्थेषु विस्तृताऽऽत्चारसंहिता दृष्टिपथमुपयति।[३३] एतस्मादेव सम्पूर्णेऽपि संस्कृतवाङ्मये गुरुशुश्रूषायाः प्रचुर–प्रचोदनं पदे–पदे चित्तमाह्लादयति। न केवलं स्मृतिपुराणादिष्वपितु कालिदासादीनां काव्येऽपि **'शुश्रूषश्व गुरून्**[३४] इत्यादिरूपेण गुरुशुश्रूषापूर्वकं गुरूणामाज्ञाऽविचारणीया प्रोक्ता यथा **आज्ञा गुरूणां ह्यविचारणीयाः।**[३५]

गुरुसेवाश्रद्धादिविषयाणां पराकाष्ठा तत्र द्रष्टव्या प्रतीयते यत्र गुरोर्निन्दापरीवादपरिहाराय तच्छ्रवणमपि निषिद्धमभिहितम्–

**गुरोर्यत्र परीवादो निन्दा वाऽपि प्रवर्तते।**
**कर्णौ तत्र पिधातव्यौ गन्तव्यं वा ततोऽन्यतः।।**[३६]

अतो ब्रह्मविष्णुमहेश्वररूपोऽयं गुरुः श्रद्धाभक्तिपूर्वकं, सादरं पूज्यो वन्द्यश्चाऽस्ति। शास्त्रेषु विद्याविनयान्वितं गुरुं भक्त्या सन्तोषयेद् इत्युक्त्वा सर्वथा तं पूजार्हमङ्गीकृतम्–

**गुरुं सन्तोषयेद् भक्त्या विद्याविनयतत्परम्।**
**प्रस्तोकाय ददुः पायुः स्तुत्या तुष्टोऽस्त्रमण्डलम्।।**[३७]

किन्त्वत्र चिन्तनीयमिदमस्ति यद्वयं किं दत्वा केनोपायेन वा गुरुं तोषयितुं शक्नुमो यतो हि परमतुष्टाय सर्वस्वरूपाय तस्मै किन्दातव्यम्। दातव्योऽस्ति केवलं भावः सेवा श्रद्धादरादिरूपेण। तैत्तिरीयोपनिषदि मातरं पितरं गुरुं च देवमङ्गीकृत्य **'मातृ देवोभव पितृ देवो भव आचार्य देवो भव**[३८] इत्युक्त्वा मातृपितृभ्यां सार्द्धमेव गुरवे देवत्वमधिष्ठितम्, देवास्तु भावप्रधाना एव भवन्ति। अतएव केवलं सेवाभावमात्रेण तोष्यास्सन्ति गुरवः। वस्तुतः पृथिव्यामीदृशं द्रव्यमेव न विद्यते यं गुरवे समर्प्यानृणी भवितुं शक्नोति मनुष्यः, यथोक्तं चाणक्यनीतिदर्पणे–

---

३२. याज्ञवल्क्यंशिक्षायाम् – १७०
३३. मनुस्मृतौ २.१६२–२१२
३४. अभिज्ञानशाकुन्तले ४.१४
३५. रघुवंशे १४.४६
३६. मनुस्मृतौ २.२००
३७. कल्याणवेदाकथाङ्के पृ. २८०
३८. तैत्तिरीयोपनिषदि १.११.२

**एकमप्यक्षरं यस्तु गुरुः शिष्ये निवेदयेत्।**
**पृथिव्यां नास्ति तद् द्रव्यं यद् दत्वा चानृणीभवेत्।।**[३९]

अतो **'यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ'**[४०] इति श्वेताश्वतरोपनिषद्वचनमाश्रित्य परमदेवत्वभावनयैकनिष्ठश्रद्धया सेवापूर्वकं वेदाऽध्ययनं कृत्वैवेह ब्रह्मयज्ञेन मन्येऽहमनृणकल्पना साकारीकर्तुं शक्यते यतोहि गुरुमुखेन ब्रह्मचर्यपूर्वकं वेदाऽध्ययनं कृत्वा ऋणत्रये ऋषि–ऋण–निष्कृति–र्विहिता।[४१]

सम्पूर्णमपि संस्कृतवाङ्मयं गुरुमहिमानमग्ङ्गीकृत्य विविधरूपेण गुरुतत्त्वं बहुधा प्रचोदयति। लौकिकेऽस्मिन् जगति प्रायः सर्व एव प्राणिनोऽन्योऽन्यमभिभूय स्वकीयस्याऽतिरेकं वाञ्छन्ति किन्तु गुरुरेव केवलं मातृपितृवत् शिष्यस्याऽप्रतिमं विजयं कामयते नाऽन्यो यथोक्तम् –

सर्वेभ्यो विजयमिच्छेत् पुत्राच्छिष्यात् पराजयम्।।

अतः पुत्रात् पराजयं कामयमानः पिता यथा पुत्राय परमोत्कर्षं कामयते, शिष्यकृतं पापमपि वोढुं समर्थो गुरुः तथैव शिष्यस्य परमौत्कृष्ट्यं कामयमानस्तस्मात् स्वकीयं पराजयमपि गौरवास्पदमङ्गीकरोति। अतो धन्योऽयं गुरुर्यो हि शिष्याय सर्वदा सर्वथा ऐहिकमामुष्मिकञ्च परमकल्याणमेव सम्पादयति। यस्य स्मरणमात्रेणैव सर्वाणि शास्त्राणि सर्वाश्च वेदवेदाङ्गविद्याः परमार्थज्ञानविज्ञानं सर्वं खलु साकारस्वरूपं धृत्वा सर्वथोपकृत्य शिष्यं ब्रह्मसाक्षात्कारं कारयन्ति। अतो यस्मात् परतरं नाऽस्ति किञ्चिदिति मत्वा गुरूपासनं सङ्कल्प्य शिवमहिम्नस्तोत्रे पुष्पदन्तेन प्रोक्तं पद्यं शिवस्वरूपस्य गुरोः स्तवनमग्ङ्गीकृत्य गुरुतत्त्वञ्च धीमहि इत्युक्त्वा श्रीगुरुपादपङ्केरुहेभ्यः स्वकीयं सर्वस्वं समर्प्यते–

**असितगिरिसमं स्यात् कज्जलं सिन्धुपात्रे**
**सुरतरुवरशाखा लेखनी पत्रमूर्वी।**
**लिखति यदि गृहीत्वा शारदा सर्वकालं**
**तदपि तव गुणानामीश पारं न याति।।**[४२]

***

३९. चाणक्यनीतिदर्पणे १५.२
४०. श्वेताश्वतरोपनिषदि ६.२३
४१. तैत्तिरीयसंहितायाम् ६.१.११
४२. शिवमहिम्नस्तोत्रे – ३२

**डॉ० अनिलकुमारपोरवालः**
लखनऊ

# अयनांशविचारः

ज्योतिषशास्त्रे कस्यापि दृश्यपदार्थस्य साधनं ज्ञानञ्चायनांशं बिना नैव भवति, अतो सिद्धान्तस्य दृश्यत्वप्रसङ्गेऽस्य ज्ञानमवश्यकमिति। जातकपद्धतेः प्रौढमनोरमाटीकायां दिवाकरदैवज्ञेन प्रोक्तं यदयनांशसंस्कृतग्रहाः क्रान्त्यादि–साधनार्थमेव स्पष्टाः भवेयुर्न तिथ्यादिसाधनार्थं फलादेशार्थञ्च।[1] प्रसङ्गेऽस्मिन् अयनस्यांशा अयनांशा भवन्ति। अयनांशो नाम क्रान्तिपातस्य चलनेन उत्पन्नांशाः। पातो नाम नाड़ीक्रान्तिवृत्तयोः सम्पातः, क्रान्त्यभावे यावन्त् ग्रहश्चक्रशुद्धः स क्रान्तिपातः। अस्यैव वर्णनं मुञ्जालाद्यैः अयनचलनम् इत्यादिना कृतम्। यतो ह्यनेन क्रान्तिपातेनायनस्य नाड़ीक्रातिन्वृत्तयोः सम्पातात् प्रवृत्तराश्यान्तरगमनस्य यथास्थितक्रान्तिवृत्तस्थ एव अत्यन्तमधिकृत्य प्रवृत्तराश्यन्तरगमनस्य प्राक् पश्चाच्–चलनं भवति। अतोऽयनचलनमिति युक्तियुक्तम्। अयन–चलनांश इति व्यक्तव्ये लाघवादयनांशाः कथ्यन्ते –

**विषुवत्क्रान्तिवलयोः सम्पातः क्रान्तिपातः स्यात्।**
**तद्भगणाः सौरोक्ता व्यस्ता अयुतत्रयं कल्पे।।**

**अयनचलनं यदुक्तं मुञ्जालाद्यैः स एवायम्।**[2]

खगोलीयपरिभाषानुसारेण नाड़ीक्रान्तिवृत्तयोः सृष्ट्यादिकाले यत्र सम्पातः स निरयणमेषादिः तदानीमयनांशाभावात्, कालान्तरेण स बिन्दुः वेधेन चलरूपः सिद्धः, अतः सृष्ट्यादिकालिकवर्तमानकालिकनाड़ी–क्रान्तिवृत्तयोः सम्पातयोर्यदन्तरं त एव अयनांशाः। गोलीयरेखा गणितस्य नियामनानुसारेण गोले कयोरपि महद्वृत्त्योः सम्पातः स्थानद्वये भवति, अतो गोलपृष्ठस्थितयोः नाड़ीक्रान्तिवृत्तयोरपि प्राच्यां प्रतीच्यां च स्थानद्वये संयोगो भवति। अतो विषुवभवृत्तयोः सम्पातरूपबिन्दू क्रमशः विषुवः शरत्सम्पाताख्यौ भवतः कुत्रचिदयं ग्रहरूपेणापि स्वीकृतोऽस्ति।

ज्योतिर्विज्ञाने अर्कसोमयाजिमहोदयेनोल्लिखितं यदयनचलनं प्रथमतो

---

१. जातकपद्धतौ, श्लोक – सं. १ टीकायाम्

२. सिद्धान्तशिरोमणौ, गोलाध्याये, गोलबन्धाधिकारे, श्लोक – सं. १७–१८

वराहमिहिराचार्येणाविष्कृतम्।[३] परन्तु वेद–वेदाग्ङ्गेषु एतद् विषयकं वचनं दृष्ट्वा तन्मतमुचितं न प्रतिभाति तथापि एतत् सत्यमस्ति यद् वराहमिहिरकालेऽस्य ज्ञानविधिः विशदरूपेण प्राप्यते।

वैदिककाले कृतिकानक्षत्रे पूर्वस्वस्तिकमासीत्।[४] अतः तदानीं कृतिकानक्षत्र एव नाड़ीक्रान्तिवृत्तसम्पात आसीत् इति अनुमीयते। कृतिकाया योगतारा कृत्तिकानक्षत्रस्य चतुर्थचरणे सिद्धान्तग्रन्थेषु पठ्यते। एकस्मिन् भचक्रपादे पादोनसप्तनक्षत्राणि भवन्ति। अतो वैदिकयुगे शतभिषानक्षत्रस्य प्रथमपादे सौम्या–यनबिन्दुः सिध्यति। वेदाङ्गज्योतिषे महात्मनालगधेन प्रतिपादितं यदयनबिन्दुः आश्लेषार्द्धे धनिष्ठार्धे च सम्प्रति दृश्यते। यथा–

**प्रपद्येते श्रविष्ठादौ सूर्यचन्द्रमसावुदक्।**
**सार्पार्धे दक्षिणार्कस्य माघश्रवणयोः सदा।।**[५]

बृहत्संहितायामाचार्यवराहमिहिरेण अयनचलनविषये पराशरादीनां मतमु–पस्थापयन् सार्पान्त्यपादद्वयदक्षिणायनं धनिष्ठाद्यादुत्तरायणञ्च संसूच्य स्वमतं प्रकाशयता उल्लिखितं यत् साम्प्रतं (वराहकाले) कर्कादितः (पुनर्वसुतृतीयपदान्तात्) याम्यायनं मकरादितः (उत्तरषाढ़ाद्वितीयचरणादारभ्य) सौम्यायनं भवतीति। तद्यथा–

**आश्लेषार्द्धाद्दक्षिणमुत्तमयनं रवेर्धनिष्ठाद्यम्।**
**नूनं कदाचिदासीद्येनोक्तं पूर्वशास्त्रेषु।।**

**साम्प्रतमयनं सवितुः कर्कटाद्यं मृगादितश्चान्यत्।**
**उक्ताभावो विकृतिः प्रत्यक्षपरीक्षणै र्व्यक्तिः।।**[६]

अतो निश्चीयते यदुत्तरायणबिन्दुः शनैः शनैः पश्चान्मुखमयते। आधुनिकैस्तु सम्पात एव गतिनिश्चयात् सम्पातचलनमिति तदभिधीयते। वस्तुतो यावती सम्पातगतिः तावत्येस्यनगतिर्भवतीति तत्र न किमप्यन्तरं जायते।

भारते अयनचलनस्य परिज्ञानं सर्वप्रथमं वराहमिहिरस्याभूत् तद् ग्रन्थे अयनपरीक्षणविधेरुल्लेखदर्शनात्।[७] ततः पूर्वमार्यभटीये नहि काप्ययनगतिसम्बन्धिनी चर्चा सन्दृश्यते। वराहमिहिरोऽयनगतिपरीक्षणविधिं जानन्नपि तद्गतिं निर्धारयितुं

---

३. ज्योतिर्विज्ञानम्, पृष्ठ सं. १३७
४. शतपथब्राह्मणे, २.१.२.३
५. ऋग्ज्योतिषे – ६
६. वृहत्संहितायाम्, आदित्याचाराध्याये, श्लोकसं. १–२
७. वृहत्संहितायाम्, आदित्याचाराध्याये, श्लोकसं. – ३

नाशक्नोत्। एतत्कार्यमाचार्यविष्णुचन्द्रेण रुद्रकृतनन्दाष्टकेन्दु (१८६४११) वर्षात्मकस्यायनयुगस्य निर्धारणं विधाय सम्पादितम्।[८] अयनगते स्वीकुर्वतस्तं च खण्डयतो वटेश्वरस्य कथनमस्ति यद् ब्रह्मगुप्तमतेऽहर्गणसाधिता ग्रहा लङ्कासमयाम्योत्तररेखायां भास्करोदये मध्यमा भवन्ति। तथा च तन्मतेऽयनगतेः स्वीकृतत्वान् मेषादिगता मध्यग्रहा भास्करोदयकाले पूर्वबिन्दौ समुदेष्यन्ति। परञ्च तत्काले प्रत्यक्षं अयनगतिदर्शनाद् वस्तुतो मेषादौ पूर्वबिन्दौ न भास्करोदयो जायते। तेन पूर्वोदयकालिको रविरयनसंस्कृतः सन्नेव मेषादिगतो भवेत्। एवं तात्कालिका एवाऽन्ये ग्रहा मेषादिगतरविकालिकाः स्युः। एवमत्र वटेश्वरेण सुस्पष्टतया युक्तियुक्तं स्वमतं विवेचितम्। द्वितीयार्यभटोऽयनचलनं ग्रहरूपेण स्वीकृतवान्।[९] भास्कराचार्यमते[१०] तस्य (विषुवत्क्रान्तिपातस्य) अपि चलनमस्ति। येऽयनचलन–भागाप्रसिद्धास्त एव विलोमस्य क्रान्तिपातस्य भागाः इत्युक्त्याऽचलनं स्वीकृतम्। एवं सर्वे भारतीयाचार्याः क्रान्तिवृत्त एवायनगतं स्वीकुर्वन्ति। तत्रापि केचन आन्दोलिकां गतं केचिच्च पूर्णभ्रमणं मन्यन्ते अयनबिन्दोः प्राक्पश्चाद्वा भ्रमणं सम्पातस्थानस्य नक्षत्रचक्रस्य वा भ्रमणं भवतीति, अस्मिन् विषये मतवैचित्र्यं दृश्यते। केषाञ्चनमतेन सम्पातोऽयं ग्रहादीनामिव चक्रभ्रमणं अन्येषां मतेन च दोलाभ्रमणं करोति। मुञ्जालादिमतेन अयनबिन्दुः प्रतीच्याभिमुखं चक्रभ्रमणं कृत्वा कल्पे १९९६६९ भगणानुत्पादयति।[११] सूर्यसिद्धान्तोक्त्या चायं सप्तविशत्यंशान् यावत् प्राच्यां गत्वा ततः परावर्त्य पुनः मेषादिं प्राप्य प्रतीच्यां तावानेव गत्वा पुनः मेषादिं प्राप्नोति युगे ६०० भगणाञ्च पूरयति।[१२] येनास्य दोलाभ्रमणं दृश्यते। सोमसिद्धान्तेऽपि दोलाभ्रमणपूर्वकं युगे ६०० भगणाः स्वीकृताः सन्ति। यथा **'युगे षट्शतकृत्वो हि भचक्रं प्राग्विलम्बते।'**[१३]

आधुनिकानां मतेनापि यत्र सम्पातबिन्दुर्गच्छति तत्रैव मेषादिबिन्दुरपि भवति, अतएव ते सायनगणनां कुर्वन्ति। ते भ्रमतो बाल–क्रीडाचक्रस्य (Motion of Top) दृष्टान्तेन प्रतिपादयन्ति यद् भुव आकृतिः गोलाकारा नास्ति, अपितु दीर्घगोलाकारेति येन तस्याः केन्द्रं गोलकेन्द्रादन्यत्र भवति। रविचन्द्रयोः आकर्षणदिगपि सा न समा अतस्तयोः आकर्षणविलक्षणतया भुवोऽक्षः कदम्बस्थनं परितो भ्रमति येन नाड़ी–क्रान्तिवृत्तयोः सम्पातबिन्दू अपि चलौ भवतः। एवं केचन अयनबिन्दौ केचिच्च

---

८. ब्रह्मस्फुटसिद्धान्ते, अध्यायः ११, श्लोकः ५४, सुधाकरद्विवेदिकृता टीका।

९. महासिद्धान्ते, १.११

१०. सिद्धान्तशिरोमणौः, गोलाध्याये, ६.१७

११. मरीचिकारः, सिद्धान्तशिरोमणौः, पृष्ठसङ्ख्या– २४७

१२. त्रिंशत्कृत्यो युगे भानां चक्रं प्राक् परिलम्बते।

१३. सोमसिद्धान्ते, स्पष्टाधिकारे, श्लोक – सं. ३१

सम्पातबिन्दौ अयनगतिमुररीकुर्वन्ति। सम्प्रति पाश्चात्यैः नाड़ीक्रान्तिवृत्तसम्पाते नाड़ीवृत्तेऽयनगतिर्मन्यते। अतएव तैरिदं चलनं विषुवचलनमिति व्यपदिश्यते।

अयनांशगतिसन्दर्भे वराहकालादेवाऽयनांशगणनाया आरम्भो दृश्यते परन्तु तत्रायनगतिसम्बन्धिनं वर्णनं नोपलभ्यते। वर्तमानसूर्यसिद्धान्ते अयनस्य त्रिशंत्कृत्यो युगभगणा निर्दिष्टाः। "त्रिंशत्कृत्य" इति प्रयोगमवलम्ब्य प्राचीनाचार्येषु शिरोमणेः मरीच्यादिषु बहु वादविवादो दृश्यते। परञ्च सम्प्रति प्रायः सर्वसम्मत्या षट्शतानि युगभगणा मन्यन्ते।[१४] रोमशसोमब्रह्मसिद्धान्तादिष्वपि एतावन्त एव युगभगणा अयनस्य विद्यन्ते। अतः सूर्यसिद्धान्ते त्रिशत्कृत्य इति पाठस्तथाऽस्य षट्शतरूपार्थग्रहणं समुचितं प्रतिभाति। येनास्य वार्षिकी गतिः ५४'' विकला मिता सिद्ध्यति। मुञ्जालमतेन कल्पेऽस्य भगणाः १९९६६९ भवन्ति।[१५] अतः त्रैराशिक गणितेन गतिः (५८/५४/२/३१/३२)=५९.६००६ विकलामिता। द्वितीयार्यभटपराशरमतेन च ५८१७०९ भगणाः, ४६.३ विकलात्मिका च गतिरस्ति।[१६] ग्रहलाघवे[१७] मल्लारिणा प्रोक्तं यदयानांशस्य धनत्व–ऋणत्वविषये उपलब्धिरेव वासना परं तथापि तेन दोलाभ्रमणं चतुर्विंशत्यिंशाः परमायनांशाश्च स्वीकृत्य कलामिता गतिः स्वीकृता, तेषां मते ये ५४" विकलामतानुयायिनः सन्ति ते २७ मितं परमायनांशाः इति स्वीकुर्वन्ति। करणकुतूहले भास्करेण **"अयनांशाः करणाब्दलिप्ताः युक्ता भवास्तद्युतमध्यमानोः"**[१८] इत्यादिनाऽस्य कलामिता गतिः प्रदत्ता। सर्वानन्द– करणग्रन्थे ग्रन्थकारेणाधुनिकविधिनायनगतिकारणं निरूपयता ५०.२ विकला गतिः स्वीकृता। तद्यथा–

**पृथिव्याः स्वभ्रमणवशान्निरक्षभागाः**
**क्षिप्ताः स्युर्बहिरुडुपार्कजाच्च तत्र।**
**आकर्षाच्छरादिशनैरितः प्रतीच्यां**
**सम्पातौ द्वयगुरवशरोन्मिता विलिप्ताः।।**[१९]

---

१४. (क) रोमकसिद्धान्ते, स्पष्टाधिकारे, श्लोक –सं. ३
(ख) शाकल्योक्तब्राह्मसिद्धान्ते, २.१
(ग) सोमसिद्धान्ते, स्पष्टाधिकारे, श्लोक – सं. ३१
(घ) लघुवशिष्ठसिद्धान्ते, स्पष्टाधिकारे, श्लोक –सं. ५५

१५. तत्पक्षे तद्वगणाः कल्पे गोऽङ्गर्तुनन्दगोचन्द्राः। (सिद्धान्तशिरोमणौ, गोलाध्याये, ६.१८)

१६. भारतीय ज्योतिष, शङ्कवर बालकृष्णदीक्षितः, पृष्ठ सं ४४०

१७. ग्रहलाघवे, केदारदत्तजोशी, मल्लारिटीकायाम्, पृ. सं. ६५

१८. करणकुतूहले, स्पष्टाधिकारे, श्लोक – सं. १७

१९. सर्वानन्दकरणे, त्रिपश्नाधिकारे, श्लोक – सं. २६

एवमेवान्येष्वपि ग्रन्थेषु ५०–६० विकलापर्यन्तं गतिर्दृश्यते। वेधकुशलदैवज्ञेन केतकरेण[२०] ५०.२ विकला, सिद्धान्तसम्राट्ग्रन्थे जगन्नाथेन च १६५१ मितशकाब्दे ५१.२७.५० विकलादिक अयनगतिः निर्धारिता।

पाश्चात्यास्तमयनचलनं Processing of Equinoxes कथयन्ति। हिपार्कनामके ग्रीकदेशीय ई० पू० १२५ वर्षेऽअस्यान्वेषणं कृतमासीत् परन्तु तन्मतेऽयनगतिः ३६ विकलां एवासीत्। तस्मात् ३०० वर्षानन्तरं टालभीमहोदयेन अयनगतेः सिद्धान्तो निरूपितः।[२१] अधुना पाश्चात्यानां मतेऽपि ५०.२ विकला मितैवायनगतिरस्ति। प्राच्य–पाश्चात्यमतयोः समीक्षणेन मुञ्जालोक्ता ५६.६ विकलाऽतीव सूक्ष्मा १ कला च सूक्ष्मा प्रतीयते यतो ह्यधुना सायनवर्षं (Tropical Year) ३६५/१४/३१/५५ दिनात्मकं भवति, सूर्यसिद्धान्तानुसारेण च ३६५/१५/३१/३१/२४ अत एतयोरन्तरं–५६/३६/२४ पलादिकं भवति। अतो यदि सौरवर्षे ३६० अंशभोगः तदान्तरपलैः किमति इत्यादिना ५६ कलासन्नं अयनांशमानं भारतीयपद्धत्या सिद्ध्यति। प्रकारान्तरेणैवमपि प्रतिपादयितुं शक्यते यदधुना सूर्यसिद्धान्तोक्तं वर्षमानम् आधुनिकनिरयणवर्षमानात् ८/३४/३७ पलाधिकम्। अतो ३६०० पलैः ३४३८ सूर्यस्य मध्यमा विकलात्मिका गतिः तदा ८/३४/३७ पलैः किमति इतयादिना ८. ३७ विकलायाति। अतो भारतीयायनगतिः= (आधुनिकी गतिः) ५०.२+८.३७ (वर्षदैर्ध्यान्तरकलाः)=५८.५७ कलाः। यदाऽस्य स्थाने गणितसौविध्याय स्वल्पान्तरात् १ कला गृह्यते तदापि भारतीयायनांशमानमतीव शुद्धमिति।

अयनांशविषये वराहमिहिराचार्यस्य कथनमस्ति यतःसम्प्रति मकरकर्कयोः सौम्ययाम्यायनं मन्यते। भविष्यत्कालेऽन्तरे पतिते प्रत्यक्षपरीक्षया अयनांशस्य निश्चयः कार्यः। परीक्षणविधं प्रदर्शयता तेन लिखितमस्ति यद् रवेरुत्तरगमनदर्शने उत्तरायणं दक्षिणगमने च दक्षिणायनं वाच्यम्। अथवा मध्याहन्च्छायाधिक व्यासार्द्धवृत्तकेन्द्रे शङ्कुं निवेश्य वृत्तपालौ छायाप्रवेशनिर्गमचिह्ने कार्ये पुनः द्वितीयदिवसे चिह्ने कृते छायाह्रासवृद्धिदर्शनेन रवेरुत्तरदक्षिणगमनं ज्ञातव्यम्। एवं क्रियमाणे अयनारम्भदिने तत्काले छायाद्वारा रविं प्रसाध्यायनबिन्दोर्ज्ञानं स्यात्।[२२]

---

२०. खखाष्टभूम्यूनशकात्खशैलेः खपञ्चभिर्भागकलादिलब्ध्योः।
यदन्तरं तत्सहिता द्विहस्ता अष्टौ सुरास्तेऽयनभागसञ्ज्ञा।।
(केतकीग्रहगणिते, स्पष्टाधिकारे, श्लोक–सं. ६)

२१. केतकीग्रहगणिते, केतकीपरिमलेन वासनाभाष्य, पृ. सं. १०८

२२. साम्प्रतमयनं सवितुः कर्कटाद्यं मृगादितश्चान्यत्।
उक्तभावो विकृतिः प्रत्यक्षपरीक्षणैर्व्यक्तिः।।
दूरस्थचिन्हवेधादुदयेऽस्तमयेऽपि वा सहस्रांशोः।
छायाप्रवेशनिर्गमचिह्नैर्वा मण्डले महति।।
(बृहत्संहिताधिकारे, आदित्यचारे, श्लोक –सं. २.३)

एवमेव सूर्यसिद्धान्तेऽपि लिखितमस्ति यद् विषुवद्द्वये अयनद्वये च वेधेन यस्य स्फुटं दृक्तुल्यता विधेया। परीक्षणार्थं करणद्वाराऽथ च छायाद्वारा द्विधा रविं प्रसाध्य छायार्कात् करणागते हीने उभयोरन्तरं भचक्रं प्राक् चलितं ज्ञेयम् अर्थात् सम्पातोऽश्विनीभतः पश्चाद्गतो ज्ञेयः। एतद्विपरीते च विपरीतं ज्ञेयम्। छायागतो रविः सायनो भवति करणागतश्च निरयणस्तेन तयोरन्तरमयनांशाः भवन्तीति स्पष्टम्।[२३] एतदनुरूपमेव भास्कराचार्येणापि प्रकारो दर्शितो यस्मिन् दिने सम्यक् प्राच्यां रविरुदितो दृष्टस्तद्विषुवद्दिनम्। तस्मिन् दिने गणितेन स्फुटो रविः कार्यः। तस्य रवेर्मेषादेश्च यदन्तरं तेऽयनांशाः।[२४]

अथाहर्गणवशात् साधिता ग्रहा यतो निरयणा भवन्ति, तथा ग्रहक्रान्तिचरच्छायादीनां सायनमेषादितः प्रवृत्तिरतो अहर्गणोत्पन्नग्रहे क्रान्त्यादितसाधनार्थमयनांशसंस्कारो युक्तियुक्त एवेत्युपपन्नं सर्वम्।

***

---

२३. स्फुटं दृक्रतुल्यता गच्छेदयने विषुवद्द्वये।
प्राक् चक्रं चलितं हीने छायार्कात् करणागते।।
अन्तरांशैरथावृत्या पश्चाच्छेषैस्तथादिके।
(सूर्यसिद्धान्ते, त्रिपश्नाधिकारे, श्लो० – ११.१२)

२४. सिद्धान्तशिरोमणौ, गणिताध्याये, पाताधिकारे, श्लोक–२, वासनाभाष्ये

**पूर्णेन्दुप्रतापसिंहः**
इलाहाबादम्

# अभिनवगुप्तस्य रससिद्धान्तः

**'रामादिवद् वर्तितव्यम् न रावणादिवदिति'** अयं शिवसन्देशः संस्कृतविद्याया वागर्थविग्रहेण निरन्तरमुद्भासमान आसीद् येन विश्वसाहित्ये संस्कृतसाहित्यस्याऽ–नुपमस्थानमद्यावधि सुरक्षितं वर्तते। जगतः कस्यांश्चिदपि भाषायाः साहित्यं संस्कृतसाहित्यमभिभवितुं न क्षमम्। संस्कृतसाहित्यं चिरकालादेव स्वविविधकाव्यविधासु पुष्पितं पल्लवितं चाभूत्। रसस्य अक्षया मन्दाकिनी संस्कृतकवितायाः समग्रयात्रायां प्रतिक्षणं प्रवाहमाना आसीद् यया सहृदयः सामाजिकः आनन्दितः सत्प्रेरितश्च भवन् पुरुषार्थचतुष्टयं प्राप्य जीवनसौभाग्यम–नुभूय कृतकृत्यः अभवत्।

भारतीयसाहित्यचिन्तने रससिद्धान्तस्य विवेचनमतिप्राचीनं महत्त्व–पूर्णञ्चास्ति। यद्यपि सिद्धान्तरूपेऽस्योल्लेखः सर्वप्रथमं भरतकृतनाट्यशास्त्रेऽभवत् परन्तु निश्चितरूपेण नाट्यशास्त्रात् पूर्वमेव शब्दोऽयं विद्यमान आसीत्। अस्य शब्दस्य प्राचीनतां तस्य अर्थस्य विकासं च दृष्ट्वा ज्ञायते यद् रसशब्दस्य प्रथमः प्रयोगः ऋग्वेदे प्राप्यते।

यद्यपि **'रसाधिकारिकं नन्दिकेश्वर'** इत्यभिधाय ब्रह्मणा स्वमानसजातेषु अष्टादशशिष्येषु रसविषयिकी दीक्षा सर्वप्रथमं नन्दिकेश्वराय प्रदत्ता, एवंविध उल्लेखः प्राप्यते, परन्तु तस्य न कापि कृतिरुपलब्धा अत आचार्यभरत एव रससिद्धान्तस्य आद्याचार्यः अङ्गीक्रियते, तेन रचितं 'नाट्यशास्त्रं' षट्त्रिंशद् अध्याये विस्तृतमस्ति। अयमेव रससिद्धान्तस्य आलोचनाशास्त्रस्याद्यो ग्रन्थः। आचार्यभरतः ख्रिष्टाब्देः प्रथमायां शताब्द्यां स्वग्रन्थे नाट्यशास्त्रे अभिनयप्रसङ्गे मनोभावानां प्रस्तुतीकरणं कृतवान्। तत्र रसनिष्पत्तेर्व्याख्या एवं कृता–

तत्र रसानेव तावदादावभिव्याख्यास्यामः–

**नहि रसादृते कश्चिदर्थः प्रवर्तते।।**

**तत्र विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः।**[१]

आचार्यभरतस्येदमेव सूत्रं रससिद्धान्तस्याधारभित्तिरस्ति। रससूत्रस्य सम्यग्बोधाय स्थायीभावविभावानुभावव्यभिचारिभावानां स्वरूपमवबोध्यम्।

१. नाट्यशास्त्रे ६.३१

## स्थायीभावः

साहित्यशास्त्रीयाचार्याणामनुसारेण स्थायीभावो मनुष्यजातेः स अतिप्ररूढः सर्वमान्यश्च संस्कारावस्थितो भावोऽस्ति यो विरोधिभिरविरोधिभिः वा भावैः अनभिभवन् तान् स्वसहकारी भावः करोति रसरूपेण च परिणमति–

**विरुद्धैरविरुद्धैर्वा भावैर्विच्छिद्यते न यः।**
**आत्मभावं नयत्यन्यान् स स्थायी लवणाकरः।।**[२]

आचार्यविश्वनाथः स्थायीभावस्य परिभाषां स्वीकरोति–

**विभावेनानुभावेन व्यक्तः सञ्चारिणा तथा।**
**रसतामेति रत्यादिः स्थायीभावः सचेतसाम्।।**[३]

आचार्यभरतेन स्थायीभावानामष्टभेदाः स्वीकृताः–

**रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा।**
**जुगुप्सा विस्मयश्चेति स्थायिभावाः प्रकीर्तिताः।।**[४]

आचार्यः मम्मटो विश्वनाथश्च आचार्यौ शान्तं नवमं रसं मत्त्वा निर्वेदं तस्य स्थायीभावः स्वीकुरुतः–

**निर्वेदस्थायिभावोऽस्ति शान्तोऽपि नवमो रसः।**[५]

## विभावः

'विभावः' इति शब्दस्य व्युत्पत्तिरेवं क्रियते, **'विशेषेण भावयति उत्पादयति, भावमात्रमिति विभावः।'** आचार्यभरतो नाट्यशास्त्रस्य सप्तमेऽध्याये विभावस्योल्लेख एवं करोति–

**बहवोऽर्था विभाव्यन्ते वागङ्गाभिनयाश्रयाः।**
**अनेन यस्मात्तेनायं विभाव इति सञ्ज्ञितः।।**[६]

साहित्यदर्पणे आचार्यविश्वनाथः एवम् अभिदधाति लोके यानि रत्यादेः उद्बोधकानि कारणानि सन्ति त एव नाट्ये काव्ये च विभावाः कथ्यन्ते–

---

२. दशरूपके ४.३४
३. साहित्यदर्पणो ३.१
४. नाट्यशस्त्रे ६.१७
५. काव्यप्रकाशे ४.४७
६. नाट्यशास्त्रे ६.१७

**रत्याद्युद्बोधकाः लोके विभावाः काव्यनाट्ययोः।।**[७]

आलम्बनोद्दीपनभेदेन विभावो द्विधा भवति–

**आलम्बनोद्दीपनाख्यौ तस्य भेदावुभौ स्मृतौ।**[८]

प्रत्येकरसस्यालम्बनोद्दीपनविभावाः पृथग् भवन्ति।

## अनुभावः

अनुभावाः शरीरस्य बाह्माभ्यन्तरिका व्यापाराः सन्ति। आचार्यभरतो नाट्यशास्त्रे अनुभावानां विशेषं महदुपयोगश्च अभिनय एव स्वीकरोति–

**वागङ्गाभिनयेनेह यतस्त्वर्थोऽनुभाव्यते।**
**शाखाङ्गोपाङ्गसंयुक्तस्त्वनुभावस्ततः स्मृतः।।**[९]

परन्तु रसानुभूतिसमये कण्ठावरोधः, अश्रुपातः, पुलकावलिः, इत्यादयः काव्यं श्रुत्वापि सह्रदयेषु दृश्यन्ते। अभिनये तेषामाधिक्यं दृश्यते। आचार्यविश्वनाथानुसारेण स्वैरुद्बुद्धकारणैर्बहिर्भावं प्रकाशयन् लोके यः कार्यरूपः काव्यनाट्ययोः सोऽनुभावः –

**उद्बुद्धं कारणैः स्वैः स्वैर्बहिर्भावं प्रकाशयन्।**
**लोके यः कार्यरूपः सोऽनुभावः काव्यनाट्ययोः।।**[१०]

## व्यभिचारिभावः

ये स्थिरा अनियताश्च भावाः स्थायिभावस्याऽन्तो विचरन्तो रसान् पुष्यन्ति आस्वादयोग्यं च कुर्वन्ति ते व्यभिचारिभावाः सञ्चारिभावा वाऽभिधीयन्ते। साहित्यदर्पणकार आचार्यविश्वनाथो व्यभिचारिभावांन् एवं परिभाषयति–

**विशेषादाभिमुख्येन चरणाद्व्यभिचारिणः।**
**स्थायिन्युन्मग्नानिमग्रास्त्रयस्त्रिंशच्च तद्विदाः।।**[११]

आचार्यो भरतो व्यभिचारिभावानां सङ्ख्या त्रयस्त्रिंशत् स्वीकरोति। आचार्यमम्मटः, विश्वनाथश्च एतावतीं सङ्ख्यां स्वीकुर्वते। आचार्यो भरतो

---

७. साहित्यदर्पणे ३.२८
८. साहित्यदर्पणे ३.२९
९. नाट्यशास्त्रे ७.५
१०. साहित्यदर्पणे ३.१३२
११. साहित्यदर्पणे ३.१४०

नाट्यशास्त्रस्य सप्तमेऽध्याये तेषां नामोल्लेखपूर्वकं त्रयस्त्रिंशत् सङ्ख्यैवाऽङ्गीकृतवान्।

**निर्वेदग्लानिशङ्काख्यास्तथाऽसूयामदश्रमाः।**
**आलस्यं चैव दैन्यं च चिन्ता मोहः स्मृतिर्धृतिः।।**

**व्रीडा चपलता हर्षः आवेगो जड़ता तथा।**
**गर्वो विषाद औत्सुक्यं निद्राऽपस्मार एव च।।**

**सुप्तं प्रबोधोऽमर्षश्चाप्यवहित्थमथोग्रता।**
**मतिर्व्याधिस्तथोन्मादस्तथा मरणमेव च।।**

**त्रासश्चैव वितर्कश्च विज्ञेया व्यभिचारिणः।**
**त्रयस्त्रिंशदमी भावाः समाख्यातास्तु नामतः।।**[१२]

यथा रसः श्रव्यदृश्ये इत्युभयात्मकस्य काव्यस्य सर्वस्वः तथैव रससिद्धान्तमपि भारतीयसाहित्यिकसमीक्षापद्धतेश्चूडान्त उत्कर्षोऽस्ति यस्य विवेचनं खीष्टाब्दस्य पूर्वं रचितस्य साहित्यसमीक्षापरकस्य विश्वकोषात्मकस्य च ग्रन्थस्य नाट्यशास्त्रस्य रचनाकाराद् भरतात् प्रारभ्याद्यावधिपर्यन्तं प्रायेण सर्वैः समीक्षकाचार्यैः कृतम्। आचार्याणां कृतिषु रसस्य व्याख्या तत्त्वं, सिद्धान्तं, सम्प्रदायश्चेति त्रिविधरूपेषु प्राप्यते। तत्त्वरूपे कृतायां रसव्याख्यायां तस्य लक्षणं, स्वरूपं भेदप्रभेदं च निरूप्यते। तथैव सम्प्रदायरूपे तेषामाचार्याणां मतानि विवेचितानि ये रसमेव साक्षात् परोक्षरूपेण वा काव्यस्यात्मानं, प्राणं, सर्वस्वं वा स्वीकुर्वन्ति। तर्हि रससिद्धान्तस्य व्याख्यायै विविधानां दार्शनिकसिद्धान्तानामाश्रयो गृह्यते, यतो हि भारतीयदर्शनस्य प्रायेण सर्वेऽनुयायिनः स्वदार्शनिक–सिद्धान्तानुसारेण रसस्य सैद्धान्तिक–व्याख्याः प्रस्तुतवन्तः।

मध्यकालिकाभारतस्य प्रतिभापरिमण्डितायां विद्वच्छृङ्खलायां मध्यमणिरिव भासमानो विलक्षणप्रतिभासम्पन्नः काश्मीरस्य शैवाचार्येष्वन्यतमः प्रत्यभिज्ञादर्शनस्य मौलिक आचार्योऽभिनवगुप्तः 'परममाहेश्वराचार्य' इत्युदात्तपदेन समलङ्क्रियते। स एव एतादृश आचार्यो यस्य नाट्यशास्त्रमधिकृत्य विरचिता टीका **'अभिनवभारती' 'नाट्यवेदविवृतिर्वा'** अधुनापि समुपलभ्यते।

रससिद्धान्तस्य व्याख्यायां प्रथममभिनवगुप्तो रससूत्रस्य व्याख्यातॄणां पूर्वाचार्याणां मतानि न केवलं खण्डितवान् अपितु संशोधितवान् च। पूर्वाचार्याणां मतानि एवं परिशोधयन् परिशुद्धायामाधारभूमावेव सः स्वस्य विवेचनस्य प्रासादं

---

१२. नाट्यशास्त्रस्य ६.१६–२२

निर्मितवान् तथैव स्वनूतनाभिव्यक्तिवादस्य स्थापनामकरोत्। पूर्ववर्तिनामाचार्याणा–मालोचनायाः परं सः विनम्रभावेनाभिदधाति–

**तस्मात् सतामत्र न दूषितानि मतानि तान्येव तु शोधितानि।**
**पूर्वप्रतिष्ठापितयोजनासु मूलप्रतिष्ठाफलमामनन्ति।।**[१३]

अभिनवभारत्यामभिनवगुप्तस्य रसविषयकं मतमधोलिखितमस्ति–

**तत्काव्यार्थे रसः। तत एव न परिमितमेव साधारण्यमपि तु विततम्। व्याप्तिग्रह इव धूमाग्न्योर्भयकम्पयोरिव वा। तदत्र साक्षात्कारायमाणत्वेन परिपोषिका नटादिसामग्री। यस्यां वस्तुसतां काव्यार्पितानां च देश–कालप्रमात्रादीनां नियमहेतूनामन्योऽन्यप्रतिबन्धबलादत्यन्तमपसारणे एव साधारणीभावः सुतरां पुष्यति। अतएव सर्वसामाजिकानामेकघनतयैव प्रतिपत्तिः सुतरां रसपरिपोषाय। सर्वेषामनादिवासनाचित्रीकृतचेतसां वासनासंवादात्। सा चाविघ्ना संवित् चमत्कारः। सर्वथा रसनात्मकवीतविघ्नप्रतीतिग्राह्यो भाव एव रसः। तत्र विघ्नापसारकाः विभावप्रभृतयः।**[१४]

ध्वन्यालोकलोचने अभिनवगुप्तस्य मतमधिकतरं स्पष्टम्–

**तस्मात् व्यञ्जकत्वाख्येन व्यापारेण गुणालङ्कारौचित्यादिकयेति कर्तव्यतया काव्यं रसान् भावयति, इति त्र्यंशायामपि भावनायां करणांशे ध्वननमेव निपतति। भोगोऽपि न काव्यशब्देन क्रियते, अपितु घनमोहान्ध्यसङ्कटानिवृत्तिद्वारेणास्वादापरनाम्नि अलौकिके द्रुतिविस्तर–विकासात्मनि भोगे कर्त्तव्ये लोकोत्तरे ध्वननव्यापार एव मूर्धाभिषिक्तः। तच्चेदं भोगकृत्वं रसस्य ध्वननीयत्वे सिद्धे दैवसिद्धम्। रस्यमाननवोदितचमत्कार–मतिरिक्तत्वाद् भोगस्येति। सत्त्वादीनां चाङ्गाङ्गिभाववैचित्र्यस्यानन्त्याद् द्रुत्यादित्वेनास्वादगणना न युक्ता। परब्रह्मस्वादसब्रह्मचारित्वं चास्त्वस्य रसास्वादस्य व्युत्पादनं च शासनप्रतिपादनाभ्यां शास्त्रैतिहासकृताभ्यां विलक्षणम्। यथा रामस्तथाहमित्युपमानतिरिक्तां रसास्वादोपायस्वप्रतिभा–विजृम्भारूपां व्युत्पत्तिमन्त करोतीति कमुपालम्भामहे। तस्मात्स्थितमेतद् अभिव्यज्यन्ते रसाः प्रतीत्यैव च रस्यन्ते इति।**[१५]

एवं सिद्ध्यते यद् अभिनवगुप्तानुसारेण विभावादीनां व्यङ्ग्यव्यञ्जकभाव–

१३. अभिनवभारत्यां षष्ठेऽध्याये
१४. अभिनवभारत्यां षष्ठेऽध्याये
१५. ध्वन्यालोकलोचने २.४

सम्बन्धादेव रसाभिव्यक्तिर्भवति। लौकिकैः कारणैर्नायकादिना रत्यादिभावानां स्थायित्वस्य प्रतीतिः सर्वमानेभ्योऽस्ति। ते रत्यादिभावा वस्तुतो मनोविकारा एव ये सहृदयानां सामाजिकानामन्तःकरणे वासनारूपेण सर्वदा स्थायिनो भवन्ति तेषामभिव्यक्तिर्लोके उपयुक्तहेतोः सन्निकर्षेण भवति काव्ये वा लौकिकहेतूनां विभावरूपेण परिणतिः भूत्वा तेषामेव साधारणीकरणेन भवति। स्थायिभावानां साधारणीकरणमप्यभिनवगुप्तस्य मतानुसारेण व्यञ्जनाव्यापारेण भवति। अतः साधारणीकृता विभावादयःपात्रैव्यञ्जितानां रत्यादीनामास्वाद एव रसः। अयमास्वादः अनुभूतेः सार्वभौमभावनया प्रभावितो भवति यः सामाजिकं वेद्यान्तरात् स्पर्शात् शून्यं विदधाति। अभिनवगुप्तपादाचार्यस्य मन्तव्यानां सारांश एवमस्ति।

**रसनिष्पत्तिः–**

१. नेयं रसस्याऽपितु तद्विषयरसनायाः निष्पत्तिः।

२. रसनायाः स्वरूपम्– 'रसना च बोधारूपैव'

३. प्रतीतिरेव रसनेति वक्तव्या–'प्रतीतिरेव विशिष्टा रसना'

४. प्रतीयमान एव रसोऽवगन्तव्यः

एवमभिनवेन भट्टानायकनिरूपितरसस्य **'भावनां' 'भुक्तिं'** च पृथग्व्यापारेषु विभक्तीकरणं न सङ्गतं स्वीकृतम्। रसो रसभोगश्च सहृदये चर्वणायाः निष्पत्तिरूपेण प्रतिष्ठितो वा यस्य निम्नाङ्किताः विशेषता निरूपिताः–

(क) सामाजिकस्य प्रगाढप्राक्तनसंवित्संस्कारात् काव्ये निरूपितानां रामादीनां विभावत्वानुभावयोः नटानां नटत्वस्य च ज्ञानं देशकालयोः सीमानं परित्यजति।

(ख) सामाजिकस्यात्मा वासनावशाद् यदा तस्यां प्रतीत्यामनुप्रविष्टो भवति तदा सा नहि तटस्था भवति न च परगता अपितु साधारणीभूतचित्तवृत्तेः प्रवाहस्य एकैवाखण्डज्ञानस्य गोचरभूता प्रतीतिर्भवति। इयमेव चर्वणाया निष्पत्तिः। इयमेव रसनिष्पत्तिरित्यभिधेया।

(ग) प्रस्तुतप्रतीतेः स्वरूपं विलक्षणं भवति यद् **'आनन्दैकघनं' 'निर्विध्नम्' 'अखण्डं'** च भवति।

(घ) अतो यदा 'रसानामभिव्यक्तिर्भवति' इत्यभिधीयते तदा तस्य तात्त्विकोऽभिप्रायप्रतीत्या एव रसनीयतायाः उपलब्धिर्भवति।

**"तस्मात् स्थितमेतद्–अभिव्यज्यन्ते रसाः प्रतीत्यैव च रस्यन्ते इति"।**[१६]

एवमभिनवगुप्तेन काव्यरसो नाट्यरसश्च 'प्रतीतेराधारेण समानरूपेण एकधैव स्वीकृतः। तेन सहृदयस्येमां प्रतीतिं निजसंविदः अखण्डस्य आनन्दैकधनस्य चाऽभिव्यक्तिरूपे स्वीकृत्य सविशेषं बलं प्रदत्तम्।

भरतस्य रससूत्रस्य सर्वान् व्याख्यातृननधिकृत्य विवादः प्रचलितो यत् तस्य व्याख्या कं दर्शनमनुसरति। अभिनवगुप्तपाद एव स व्याख्याता यस्याधारभूतदर्शनममधिकृत्य न वैमत्यं विद्वज्जनेषु। प्रत्यभिज्ञादर्शनस्य प्रतिष्ठापकेषु शिरोमणेरभिनवगुप्तस्य रसव्याख्याविवेचनादिदं तथ्यं स्पष्टं भवति यत् तस्य व्याख्या शिवाद्वैतदर्शनस्याऽर्थतः प्रत्यभिज्ञादर्शनस्यैव व्यावहारिकं रूपमस्ति। गुप्तपादस्य रससूत्रव्याख्यायां रसस्वरूपे चिद्रूपरत्यादेश्चर्वणा स्वगता स्वपरका चास्ति न तु वस्तुगता वस्तुपरका वा। इयमेव रसस्याद्वैतस्थितिः या आवरणभङ्गे सत्येव उपस्थीयते। अभिनवगुप्तस्य रसप्रक्रियायामियं शिवाद्वैतदर्शनस्य वस्तुतः व्यावहारिकी सङ्गतिः। यथा प्रत्यभिज्ञादर्शने कालनियतिरागविद्याकलानां पञ्चकञ्चुकानामावरणात् शून्यत्वे सति जीवः पुनः स्वं सच्चिदानन्दं शिवमिति प्रत्यभिजानीते तथैव सहृदयस्य सामाजिकस्य हृदि अवस्थितो रसोऽपि आवरणमुक्ते सति स्वं चिद्रूपमधिगच्छति।

अभिनवगुप्तो रसचिन्तनस्य परमोत्कर्षः। अभिनवगुप्तो भरतमुनेर्नाट्यशास्त्रे 'अभिनवनभारती–नाम्नीं टीकां विरच्य एकतस्तु नाट्यसम्बन्धिनं रसविवेचनमन्तिमे रूपे स्थापितवान् अपरतश्च आनन्दवर्धनाचार्यस्य ध्वन्यालोके लोचनाख्यां टीकां कृत्वा काव्यरससम्बन्धिचिन्तनं पूर्णत्वं प्रदत्तवान्। सः काव्यसर्जनात् काव्यस्वादनपर्यन्तम् अखण्डरसानुभूतिमपि सुसङ्गतं रूपं प्रदाय रससिद्धान्तं स्वतः सम्पूर्णं सर्वग्राहिणि काव्यसिद्धान्तरूपे प्रतिष्ठापितवान्। वैयाकरणेषु यत्स्थानं भाष्यकारपतञ्जलेरस्ति वेदान्तदर्शने च प्रस्थानत्रयीभाष्यकारस्य शङ्कराचार्यस्यास्ति काव्यशास्त्रे तदेव स्थानम् अभिनवगुप्तपादाचार्योऽलङ्करोति।

***

---

१६. ध्वन्यालोकस्य लोचनटीकायाम्

**डॉ० श्रीमती ज्योतिकुमारी**
छपरा

# उपनिषत्सु कठोपनिषदः स्थानम्

आचार्य–शङ्करेण दशसु उपनिषद्–ग्रन्थेषु भाष्यं लिखितम्। ताः उपनिषदः ईदृशाः वर्तन्ते–

**ईश–केन–कठ–प्रश्न–मुण्ड–माडूक्य–तित्तिरः।**
**ऐतरेयं च छान्दोग्यं बृहदारण्यकं तथा।।**[1]

एषु सर्वेषूपनिषद्–ग्रन्थेषु कठोपनिषद् महत्त्वपूर्णा अस्ति। विषय–वस्तौ भाषा–शैल्यां गम्भीर–चिन्तने च इयमुपनिषद् श्रेष्ठा अस्ति।

भाषायाः शैल्याश्च दृष्ट्या उपनिषद् त्रिधा विभज्यते। प्रथम–वर्गे बृहदारण्यक–छान्दोग्य–तैतिरीय–कौषीतकी इमाः उपनिषदः सन्ति। एषां उपनिषदां भाषा ब्राह्मण–ग्रन्थस्य शैल्यां लिखिता। एषां रचना गद्य–शैल्यां कृता। द्वितीयवर्गे कठ–ईश–श्वेताश्वतर–महानारायणोपनिषद् च सन्ति यासां भाषा छन्दोबद्धा ओजस्वी प्रवाहपूर्णा चास्ति। मैत्रायणी उपनिषद् माण्डूक्योपनिषद् च तृतीय वर्गे स्तः। ययोर् भाषा लौकिक–संस्कृतेन समा।

अनेन भाषागत–शैलीगतविभाजनस्याधारे कठोपनिषद् द्वितीयसंवर्गे स्थापिता। तत्र क्वचिद् वैदिक–भाषा प्रयुज्यते क्वचिल् लौकिक–भाषा अपि प्राप्यते। 'उशन् ह इत्यादीनां शब्दानां प्रयोगो वैदिक–भाषायां क्रियते। कठोपनिषदः प्रथम मन्त्रे ईदृशः शब्दो वर्णितः। उदाहरणमिदमस्ति–

**ॐ उशन्ह वै वाजश्रवसः सर्ववेदसं ददौ तस्य ह नचिकेता आस।।**[2]

अनेन 'एतद्वैतत्' इति वैदिकप्रयोगो वर्तते। उदाहरणेनावगन्तुं शक्यते–

**य इमं मध्वदं वेद आत्मानं जीवमन्तिकात्।**
**ईशानं भूतभव्यस्य न ततो विजुगुप्सते।। एतद्वैतत्।।**[3]

---

१. वैदिक साहित्य का इतिहास, डॉ० कृष्ण कुमार, पृष्ठ सङ्ख्या ७१

२. कठोपनिषदि १.१.१

३. तत्रैव २.१.५

इत्थं 'आत्थ; ददृशिवान् जनासः इत्यादीनां शब्दानां प्रयोगे वैदिकभाषायां बाहुल्येन क्रियते। लौकिक–संस्कृतभाषायां जनासः–शब्दस्य प्रयोगः 'जनाः' अनेन रूपेण क्रियते। लौकिक–संस्कृतभाषायाम् उपसर्गानां स्वतन्त्रप्रयोगः वर्जितः। परन्तु वैदिकभाषायामुपसर्गानां स्वतन्त्रप्रयोगः मान्यः। यथोद्धृयते कठोपनिषदि

**तिस्रो रात्रीर्यदवात्सीगृहे में अनश्नन्ब्रह्मन्नतिथिर्नमस्यः।**
**नमस्तेऽस्तु ब्रह्मन्स्वस्ति मेऽस्तु तस्मात्प्रति त्रीन्वरान्वृणीष्व।।**[४]

अनेन दृश्यते यत् कठोपनिषद् शैल्याः भाषायाश्च दृष्ट्या वैदिक–संस्कृतभाषायाः लौकिक–संस्कृतभाषायाश्च मध्ये स्थापिता।

उपनिषदो विषयवस्तोर्निदर्शनमस्य शब्दस्य व्याख्यायामेव निहितमस्ति। आचार्यशङ्करेण उपनिषद्शब्दस्य व्याख्या एवं क्रियते–

सदेर्धातोर्विशरणगत्यवसादनार्थस्योपनिपूर्वस्य क्विप्प्रत्ययान्तस्य रूपमुपनिषदिति। उपनिषच्छब्देन च व्याचिख्यासितग्रन्थप्रतिपाद्यवेद्यवस्तुविषया विद्योच्यते। केन पुनरर्थयोगेनोपनिषच्छब्देन विद्योच्यत इत्युच्यते। ये मुमुक्षवो दृष्टानुश्रविकविषयवितृष्णाः सन्त उपनिषच्छब्दवाच्यां वक्ष्यमाणलक्षणां विद्यामुपसद्योपगम्य तन्निष्ठतया निश्चयेन शीलयन्ति तेषामविद्यादेः संसारबीजस्य विशरणाद्धिंसनाद्विनाशनदिल्यनेनार्थयोगेन विद्योपनिषदित्युच्यते।।

ब्रह्म–जगत्–विद्या–ऽविद्या–परमात्मा–कर्मसिद्धान्त–पुनर्जन्म इत्यादयो विषया उपनिषद्ग्रन्थस्य प्रतिपाद्याः सन्ति।

कठोपनिषदि आत्मतत्त्वानां चिन्तनं भवति। आत्मतत्त्वानां विवेचने भाषायाः विचारस्य च उभयोः साम्यत्वमस्ति। अत्र भावसाम्यमपि परिलक्ष्यते। अयं मन्त्रो द्रष्टव्यः कठोपनिषदि–

**अणोरणीयान् महतो महीयानात्मास्य जन्तोर्निहितो गुहायाम्।**
**तमक्रतुः पश्यति वीतशोको धातुप्रसादान्महिमानमात्मनः।।**[६]

अयं भावः श्वेताश्वतरोपनिषदि एषु शब्देषु दृश्यते–

**अणोरणीयान् महतो महीयानात्मास्य जन्तोर्निहितो गुहायाम्।**
**तमक्रतुः पश्यति वीतशोको धातुः प्रसादान्महिमानमीशम्।।**[७]

---

४. कठोपनिषदि १२१.६
५. कठोपनिषदि, शङ्करभाष्ये
६. कठोपनिषदि १.२.२०
७. श्वेताश्वतरोपनिषदि ३.२०

अस्मिन् सन्दर्भे कठोपनिषदोऽयं मन्त्रो दर्शनीयः

**नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन।**
**यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनुं स्वाम्।।**[८]

अयमेव मन्त्रः अस्मिन् रूपे मुण्डकोपनिषद्यपि लभ्यते।

कठोपनिषदः अनेकाः मन्त्राः अन्यासु उपनिषत्सु प्राप्यन्ते, येषु शब्दानां भावानां चोभयोः साम्यमस्ति। भावसाम्यात् कठोपनिषद् अन्योपनिषद्ग्रन्थानां तुल्या अस्ति।

उपनिषत्सु ब्रह्मतत्त्वानां आत्मतत्त्वानां च विवेचनं प्राप्यते। तत्र ब्रह्मतत्त्वे आत्मतत्वे च उभयोरेकत्वं प्रतिपाद्यते। प्राग्वैदिकसाहित्ये उभयोर्वैषम्यं प्रतिपाद्यते। परं तु उपनिषत्काले ब्रह्मतत्त्वे आत्मतत्त्वे चोभयोरप्येकत्वं स्थाप्यते। यथोद्धृतम् मुण्डकोपनिषदि–

**द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते।**
**तयोरन्यः पिप्पलं स्वाद्वत्ति अनश्नन्नन्योऽभिचाकशीति।।**[९]

अत्र ब्रह्मत्मायुगलं सख्यभावेन शरीररूपिवृक्षे अवस्थितमस्ति।

बृहदारण्यकोपनिषदि छान्दोग्योपनिषदि माण्डूक्योपनिषदि च आत्म–ब्रह्मतत्त्वानां विवेचनं भवति। छान्दोग्योपनिषद्यनमुद्घोषः **तत्त्वमसि** ब्रह्मणि आत्मनि चैकत्वं सिद्ध्यति। तथैव यम–नचिकेत–प्रसङ्गेन कठोपनिषदि उभयोरेकत्वं स्थाप्यते।

उपनिषत्सु ब्रह्मणो जगतश्च सम्बन्धो विव्रियते। तत्र "ब्रह्म जगतः कारणमिति" स्थाप्यते। "ब्रह्म सत्यं जगन् मिथ्या" अयं स्थाप्यते सर्वत्र।

कठोपनिषदि ब्रह्मणो जगतश्चोभयोः सम्बन्धः सविस्तरं वर्णितः। उदाहरणेनावगम्यते–

**ऊर्ध्वमूलोऽवाक्शाख एषोऽश्वत्थः सनातनः।**
**तदेव शुक्रं, तद् ब्रह्म तदेवामृतमुच्यते।**
**तस्मिँल्लोकार्पिताः सर्वे तदु नात्येति कश्चन।। एतद्वैतत्।।**[१०]

इदं जगत् अश्वत्थ–वृक्षस्य समानमस्ति यस्य मूलं ऊर्ध्वमस्ति लता च

८. कठोपनिषदि १.२.२३
९. मुण्डकोपनिषदि ३.१.१
१०. कठोपनिषदि २.३.१

निम्नगामिनी अस्ति। सम्पूर्णजगत् तस्मिन् एवाश्रितम्। अत्र ब्रह्मणः सर्वव्यापकत्वं वर्णितम्।

अनेन दृश्यते यद् अन्यासामुपनिषदामिव कठोपनिषद्यपि ब्रह्मणः सर्वव्यापकत्वं तस्य जगता सह सम्बन्धश्च वर्णितः।

उपनिषदि जन्म–पुनर्जन्म–बन्धन–मोक्ष–इत्यादीनां तत्त्वानां वर्णनं प्राप्यते। कर्म–फलस्य सिद्धान्तमस्ति– यथाकर्म यथाश्रुतम्। उपनिषदः अस्मान् सत्कर्म प्रति प्रेरयन्ति। ईशावास्योपनिषदि अयं भावः कथ्यते–**कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः।**[११]

पुनर्जन्मनः कर्म–सिद्धान्तस्य च बीम् अस्मिन्नेव सन्निहितम्। सत्कर्मणा मोक्षः प्राप्यते, असत्कर्मणा बन्धने बध्यते। कठोपनिषदः अस्मिन् मन्त्रेऽयं भावः सन्निहितः–

**अनुपश्य यथा पूर्वे प्रतिपश्य तथापरे।**
**सस्यमिव मर्त्यः पच्यते सस्यमिवाजायते।।**[१२]

मानवस्य जन्म कर्मणा भवति। कठोपनिषद्ययं विचार ईदृशः पुष्यते–

**योनिमन्ये प्रपद्यन्ते शरीरत्वाय देहिनः।**
**स्थाणुमन्येऽनुसंयन्ति यथाकर्म यथाश्रुतम्।।**[१३]

अनेन कठोपनिषद्यपि कर्म–सिद्धान्ते पुनर्जन्मनि च सूक्ष्मरूपेण अन्विष्यते। अस्यामुपनिषद्यौपनिषदिक–विचारस्य वर्ण्यवस्तुनश्च पूर्णसमावेशनं भवति। आत्मतत्त्व–विवेचने मोक्ष–मार्गस्याऽन्वेषणे कर्म–सिद्धान्तस्य स्थापने पुनर्जन्म–सिद्धान्तस्य वर्णने च कठोपनिषद् उपनिषद्–वाङ्मये विशिष्टा श्रेष्ठा च।

उपनिषद् तर्कशील–संस्कृतेः प्रतीकमस्ति। अस्यां जन्म–मरण–बन्धन–मोक्ष विद्या–अविद्या च एषु विषयेषु तार्किकविश्लेषणं प्राप्यते। अस्मात् कारणात् उपनिषद् भारतीयदर्शनस्याधारभूताऽ अस्ति।

उपनिषद्ग्रन्थानामनुसारमिदं जीवनं दुःखमूलकमस्ति। इदं जीवनमनेकधा बन्धने बद्धम्। अनेन कारणेन मानवो जीवन–मृत्योश्चक्रे भ्रमति। उपनिषद् परमोपकारिणी विद्या अस्ति या मोक्षप्राप्तेः साधनमस्ति। कठोपनिषदि बन्धनस्य मोक्षस्य च तर्कपूर्णं वर्णनं लभ्यते। बन्धनस्य विषये कथ्यते–

---

११. ईशावास्योपनिषदि २

१२. कठोपनिषदि १.१.६

१३. तदेव २.२.७

**यस्त्वविज्ञानवान् भवत्यमनस्कः सदाऽशुचिः।**
**न स तत्पदमाप्नोति संसारं चाधिगच्छति।।**[१४]

कठोपनिषदि ब्रह्मपदस्य प्राप्तये उपायो विव्रियते–

**यस्तु विज्ञानवान् भवति समनस्कः सदा शुचिः।**
**स तु तत्पदमाप्नोति यस्माद् भूयो न जायते।।**[१५]

उपनिषत्सु कठोपनिषदः स्थानं मोक्ष–मार्गस्याऽन्वेषणे कर्म–सिद्धान्तस्य पुनर्जन्मनः सिद्धान्तस्य स्थापने च विशिष्टं तिष्ठति।

कठोपनिषदि यम–नचिकेतसः संवादेन मोक्षप्राप्तेः मार्गो वर्णितः। अस्याः उपनिषदः शान्ति–पाठे गुरु–शिष्ययोः सम्बन्धो विव्रियते–

**ॐ सह नाववतु। सह नौ भुनक्तु सह वीर्यं करवावहै।**

**तेजस्विनावधीतमस्तु। मा विद्विषावहै। ॐ शान्तिः शान्तिः शान्तिः।**[१६]

कठोपनिषदि यम–नचिकेतसः संवादेन उपनिषदः प्रतिपाद्यविषयाणां सरलविधिना वर्णनं प्राप्यते। उपमाऽलङ्कारस्य रमणीय–प्रयोगेन गूढ़तत्त्वानि अवगम्यन्ते। अनेन कारणेन कठोपनिषद् काव्यात्मकशैल्यां विशिष्टा अस्ति।

कठोपनिषदि जीवनयात्राया वर्णनप्रसङ्गे रथरूपकस्य निरूपणं प्राप्यते। अस्यामुपनिषदि आत्मनः शरीरस्य बुद्धेः मनसः च उपमा क्रमशो रथिना रथेन सारथिना प्रग्रहेण सह च प्रदीयते –

**आत्मानं रथिनं विद्धि शरीरं रथमेव तु।**
**बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च।।**[१७]

कठोपनिषदि दार्शनिक–तत्त्वानां तर्कशील–विवेचनं प्राप्यते। कठोपनिषदः श्रेष्ठत्वं साधनीयम् ।परमात्मनः सर्वव्यापकतायाः दृष्टान्तो वैज्ञानिकः। उदाहरणेनावगम्यते–

---

१४. कठोपनिषदि १.३.७

१५. तदेव १.३.८

१६. तदेव शान्तिपाठः

१७. तदेव १.३.३

**वायुर्यथैको भुवनं प्रविष्टो रूपं रूपं प्रतिरूपो बभूव।**
**एकस्तया सर्वभूतान्तरात्मा रूपं रूपं प्रतिरूपो बहिश्च।।**[१८]

अनेन मनोहरकाव्यात्मकगुणात् कठोनिषद् अत्यन्तम्महत्त्वपूर्णमस्ति। कठोपनिषदि नैका ईदृशाः प्रसङ्गाः सन्ति यैर्गूढ़ाध्यात्मिकानुभवः पुष्यति अत्र नाचिकेताग्नेः विशद्–विश्लेषणं प्राप्यते। अनेन सहैव तु अरणि–मन्थनस्य मानव–जीवनस्य महत्तायाः अतिथि–सत्कारस्य च विशदवर्णनमुपलभ्यते। अग्निविद्यया सम्बन्धितोऽयं मन्त्र उल्लेखनीयः –

**त्रिणाचितकेतस्त्रिभिरेत्य सन्धिं त्रिकर्मकृत्तरति जन्ममृत्यू।**
**ब्रह्मजज्ञं देवमीड्यं विदित्वानिचाय्येमां शान्तिमत्यन्तमेति।।**[१९]

नाचितकेताग्नि–विद्यायाः विस्तृतविवेचनं शतपथब्राह्मणेऽपि प्राप्यते।

कठोपनिषद्यनेकेषाम्माध्यात्मिक–तत्त्वानां विश्लेषणं प्राप्यते यन् मनसः शोधनार्थं परिष्करणार्थं च परमावश्यकमस्ति। नाचिकेताग्नेर्वर्णनेनाऽग्ने–र्महत्त्वमवगन्तुं शक्यते। अस्यामुपनिषदि अरणि–मन्थनस्य प्रसङ्ग उपस्थितः–

**अरण्योर्निहितो जातवेदा गर्भ इव सुभृतो गर्भिणीभिः।**
**दिवे दिव ईड्यो जागृवद्भिर्हविष्मद्भिर्मनुष्येभिरग्निः।।**[२०]

नाचिकेताग्नेः अरणि–मन्थनस्य च वर्णनेऽस्माभिर्दृश्यते यत् प्रकृतेः पञ्चरूपात्मकतत्त्वेषु अग्नेर्महत्त्वपूर्णस्थानमस्ति। अग्नौ परमेश्वरो निवसति। अयं परमेश्वरः सच्चिदानन्दः शिवोऽस्ति यो मोक्षप्राप्तेः साधनमस्ति। अस्य मोक्षस्य प्राप्तये मानवजीवनममूल्यमस्ति। तुलसीदासमहाभागेन साधूक्तम्

साधन–धाम विबुध–दुरलभ तनु, मोहिं कृपा करि दीन्हों।[२१] मानव–योनिः परमात्म तत्त्वस्य प्राप्तये प्रमुखः स्रोतोऽस्ति–

**यथाऽऽदर्शे तथात्मनि यथा स्वप्ने तथा पितृलोके।**
**यथाप्सु परीव ददृशे तथा गन्धर्वलोके छायातपयोरिव ब्रह्मलोके।।**[२२]

---

१८. कठोपनिषदि २.२.१०

१९. तदेव १.१.१७

२०. तदेव २.१.८

२१. प्रस्थानत्रयी, अखिल–भारतीय–विक्रम–परिषद् काशी, पृ०सं० ४७

२२. कठोपनिषदि २.३.५

उपनिषत्सु नैतिक–शिक्षायाः आदर्शस्य च विवेचनं प्रकृष्टरूपेण प्राप्यते। कठोपनिषदि अन्यासाम् उपनिषदामिव नैतिक–शिक्षा व्यापकत्वं विव्रियते। पुत्र–कर्तव्यम् अतिथि–सत्कारश्च सविस्तरेण विव्रियेते। सद्‌गुणानां वर्णनं प्राप्यते अस्माभिः किं कर्तव्यम् – अस्य प्रश्नस्य समाधानं प्राप्तुं शक्यते। वास्तविकं ज्ञानं प्राप्तुं सदैव गतिशीलो जागरितश्च भवनीयौ–

**उत्तिष्ठत जाग्रत प्राप्य वरान्निबोधत।**
**क्षुरस्य धारा निशिता दुरत्यया, दुर्गं पथस्तत् कवयो वदन्ति।**[२३]

तैतिरीयोपनिषदि छान्दोग्योपनिषदि बृहदारण्यकोपनिषदि च नैतिक–सिद्धान्तानां सविस्तरं वर्णन प्राप्यते। तैतिरीयोपनिषदि नैतिक–सिद्धान्ते आधृता अनेकाः मन्त्राः सन्ति। यथोद्‌धृतम्–

**मातृदेवो भव। पितृदेवो भव। आचार्यदेवो भव। अतिथिदेवो भव**
**..................................एवमु चैतदुपास्यम्।**[२४]

कठोपनिषद् जनानां सद्‌गुणान् अपि सविस्तरेण वर्णयति। कठोपनिषदः प्रथमाध्यायस्य द्वितीय–वल्ल्यां श्रेय–प्रेय–मार्गयोः स्वाभाविक– विवेचनं भवति–

**श्रेयश्च प्रेयश्च मनुष्यमेतस्तौ सम्परीत्य विविनक्ति धीरः।**
**श्रेयो हि धीरो अभिप्रेयसो वृणीते प्रेयो मन्दो योगक्षेमाद् वृणीते।।**[२५]

अस्य मन्त्रस्य सूक्ष्म–विश्लेषणेन ज्ञायते यद् आत्म–परमात्म–नाचिकेताग्नि अरणि–मन्थने त्यादिषु प्रसङ्गेषु नैतिकदर्शनम् आध्यात्मिकं वर्णनं प्राप्यते।

भारतीयदर्शनस्य बीजमुपनिषत्सु एवं प्राप्यते। दर्शनस्य सर्वाङ्गीणस्वरूपं तत्र प्राप्यते। सर्वासु उपनिषत्सु प्रकृति–पुरुष–माया–जगन्मोक्ष इत्यादयो विचारा विव्रियन्ते। मूलतत्त्वं प्रकृतेरिदं जगद् अस्ति। सा प्रकृतिः ब्रह्मण उपादानभूता माया अस्ति। कठोपनिषदि प्रकृति–तत्त्वस्य वर्णनम् इत्थं प्राप्यते–

**इन्द्रियेभ्यः परं मनो मनसः सत्त्वमुत्तमम्।**
**सत्त्वादधि महानात्मा महतोऽव्यक्तमुत्तमम्।।**[२६]

कठोपनिषदि प्रत्येक–मन्त्रे गम्भीर–दर्शनस्य समावेशोऽस्ति। मन्त्रेऽस्मिन्

---

२३. तदेव १.३.१४
२४. तैत्तिरीयोपनिषदि १.११
२५. कठोपनिषदि १.२.२
२६. कठोपनिषदि २.३.७

पुरुषस्य आत्मनो विषये इत्थं कथ्यते–

**अव्यक्तातु परः पुरुषो व्यापकोऽलिङ्ग एव।**
**यं ज्ञात्वा मुच्यते जन्तुरमृतत्वं च गच्छति।**[२७]

अत्र साङ्ख्य–दर्शनस्य सृष्टिक्रमस्य निदर्शनं भवति।

कठोपनिषदि विद्यायाः अविद्यायाश्च विषये दार्शनिकविवेचनं लभ्यते। गुरु–यमयोः शिष्य–नचिकेतसोः च संवादे दार्शनिकतत्त्वानां वर्णनं प्राप्यते। यमः अविद्याया विषये कथयति –

**दूरमेते विपरीते अविद्या या च विद्येति ज्ञाता।**
**विद्याभीप्सिनतं नचिकेतसं मन्ये त्वा कामा बहवोऽलोलुपन्त।**[२८]

ब्रह्म–विद्यायाः अभावो अविद्या कथ्यते। मुण्डकोपनिषद्ययं भाव उद्धृयते। अविद्यायामन्तरे वर्तमाना मानवा दन्द्रम्यमाणाः परियान्ति–

**अन्धेनैव नीयमाना यथान्धाः।**[२९]

ईशावास्योपनिषद्यपि विद्यायाः स्वरूपं सविस्तरेण अवगम्यते। कथ्यते यद् यैः पुरुषैः केवलमविद्या उपास्यते ते सांसारिकाज्ञानेषु प्रविशन्ति–

**अन्धं तमः प्रविशन्ति येऽविद्यामुपासते।**[३०]

सर्वासु उपनिषत्सु विद्याया अविद्यायाश्च विभेदो विव्रियते। परं तु कठोपनिषदि नचिकेतसो यमस्य संवादे विद्याया च स्वरूपे गम्भीरदर्शनं निहितम्।

उपनिषत्सु ऊँ तत्त्वस्य विशद व्याख्यानं प्राप्यते। ऊँ एव परमानन्दकृतो मोक्षः। अयं सच्चिदानन्दः शिवः अस्ति। कठोपनिषद्ययं भावोऽभिव्यक्तः। छान्दोग्योनिषद्–ईशावास्योपनिषद्–माण्डूक्योपनिषद्–श्वेताश्वतरोपनिषद्–आसु उपनिषत्सु अपि ऊँ तत्त्वस्य दार्शनिकविवेचनं भवति। छान्दोग्योपनिषदि शैव–उद्गीथः विव्रियते। अस्यामुपनिषदि ऊँ तत्त्वस्य सर्वाङ्गीणत्वं विव्रियते।

ओमित्येदक्षरमुद्गीथमुपासीत। ओमिति ह्युद्गायति तस्योपख्याख्यानम्।[३१]

---

२७. तदेव २.३.८

२८. तदेव १.३.४

२९. तदेव १.२.५

३०. ईशावास्योपनिषदि ६–११

३१. छान्दाग्योपनिषदि १.१.१

माण्डूक्योपनिषदि अपि ऊँ इत्यस्य महिमानं विव्रियते। तस्याः प्रारम्भिकमन्त्रे ओ३म् तत्त्वस्य सर्वाङ्गीणं वर्णनं प्राप्यते –

ओमित्येतदक्षरमिदँ सर्वं तस्योपव्याख्यानं भूतं भवद्भविष्यदिति। सर्वमोङ्कार एव। यच्चान्यत् त्रिकालातीतं तदप्योङ्कार एव।[३२]

कठोपनिषदि अन्यासूपनिषत्सु च तुलनात्मकविवेचनेन ज्ञायते यत् कठोपनिषद्यपि ऊँ तत्त्वस्य महत्त्वं विव्रियते। सर्वेषां प्राणीनामेकमात्रं लक्ष्यमस्ति–मोक्षस्य प्राप्तिः। अयं मोक्ष एव परम–धाम। यः सर्वेषु वेदेषु प्रशंसितः–

**सर्वे वेदा यत्पदमामनन्ति तपांसि सर्वाणि च यद् वदन्ति।**
**यदिच्छन्तो ब्रह्मचर्यं चरन्ति तत्ते पदं सङ्ग्रहेण ब्रवीम्योमित्येतत्।।**[३३]

अनेन वक्तुं शक्यते यत् कठोपनिषदि गम्भीरदर्शनं सन्निविष्टम्। तुलनात्मकदृष्टिकोणेन दृश्यते यत् कठोपनिषदि अन्यासामुपनिषदामिव दार्शनिक–विवेचनं प्राप्यते, परं तु यम–नचिकेतसोः संवादस्य माध्यमेन परमतत्त्वानां वर्णनमद्भुतमस्ति –

**यदा पञ्चावतिष्ठन्ते ज्ञानानि मनसा सह।**
**बुद्धिश्च न विचेष्टते तमाहुः परमां गतिम्।।**[३४]

अमर–पदस्य प्राप्तये योगः परमावश्यकः। स्थिरमिन्द्रियधारणमिति योगो मन्यते–

**तं योगमिति मन्यन्ते स्थिरमिन्द्रियधारणम्।**
**अप्रमत्तस्तदा भवति योगो हि प्रभवाप्ययौ।।**[३५]

एषां तथ्यानां विवरणेन ज्ञायते यद् उपनिषद् अस्माकं आत्मनश्च शुद्धीकरणाय अनेकान् उपायान् निर्दिशति। सर्वाः उपनिषदः श्रेष्ठाः सन्ति। परन्तु कठोपनिषद् तासु उपनिषत्सु विशिष्टा। अस्याः सूक्ष्म–मन्त्रेष्वपि व्यापक–भावः सन्निहितः। गूढ–दार्शनिकतत्त्वानां विवेचनमत्यन्त सहजभावेन क्रियते। कठोपनिषद् नाचिकेताग्नेः विवेचने ओ३म् तत्त्वस्य विश्लेषणे परमात्मस्वरूपस्य स्थापने कर्म–सिद्धान्तस्य पुनर्जन्म–सिद्धान्तस्य च वर्णने अरणि–मन्थनस्य

---

३२. माण्डुक्योपनिषदि–१
३३. कठोपनिषदि १.२.१५
३४. तदेव २.३.१०
३५. तदेव २.३.११

सूक्ष्मान्वेषणे विशिष्टस्थानं लभते। अनेन सहैव तु इयमोपनिषद् वैज्ञानिक–चित्रणे काव्यामकतायां मनोहारितायां च नैतिकगुणानां वर्णने मानव–जीवनस्य महत्तायाः विवेचनेऽपि महत्त्वपूर्णस्थानं धारयति।

उपनिषत्सु कठोपनिषद् उत्कृष्टवर्गे तिष्ठति। सा काव्यस्य सरसतायाः दर्शनशक्तेः अध्यात्मानुभवस्य गहनतायाश्च सम्मिश्रणमस्ति। अस्यामुपनिषदि वेदान्तः सूक्ष्मदृष्ट्या व्याख्यायते। अस्याः संवादात्मक–शैली अत्यन्ताकर्षका। यमस्य नचिकेतसश्च संवादोऽपि विशिष्टचित्रं प्रस्तौति। अतएव उपनिषत्सु कठोपनिषदः अतिमहत्त्वपूर्णंस्थानमस्ति।

***

# घोषणा–पत्र

'अजस्रा' नामक समाचारपत्र के सम्बन्ध में समाचारपत्र– रजिस्ट्रीकरण (केन्द्रीय) नियमावली, १९५६ के नियम ८ (१) के अधीन प्रकाशितव्य स्वामित्व–सम्बन्धी तथा अन्य ब्योरे।

**प्रारूप चार**

**१–प्रकाशन का स्थान–** अखिल भारतीय संस्कृत–परिषद्, 'देववाणी–भवनम्,' अलीगञ्ज, लखनऊ–२२६ ०२४

**२–प्रकाशन की कालिकता–** त्रैमासिक (मकर, मेष तथा कर्क, तुला की सङ्क्रान्तियों को)

**३–मुद्रक का–**
(१) नाम–श्री मनीष मेहता
(२) राष्ट्रिकता–भारतीय
(३) पता–प्नार आफसेट, १७, अशोक मार्ग, हजरतगंज लखनऊ–२२६ ०१८

**४–प्रकाशक का**
(१) नाम–श्री जितेन्द्रकुमार त्रिपाठी
(२) राष्ट्रिकता–भारतीय
(३) पता–सी–२४, 'क', 'जे' रोड महानगर विस्तार लखनऊ– २२६ ०२०

**५–सम्पादक का**
(१) नाम–डॉ. अशोककुमार कालिया
(२) राष्ट्रिकता–भारतीय
(३) पता–बी–१ /१६, कल्याण विहार, सेक्टर 'के' अलीगञ्ज, लखनऊ– २२६ ०२४

**६–स्वामी का नाम और पता–** अखिल भारतीय संस्कृत–परिषद्, 'देववाणी–भवनम्,' लखनऊ–२२६ ०२४

मैं, जितेन्द्रकुमार त्रिपाठी, एतद्द्वारा घोषित करता हूँ कि ऊपर दिये हुये ब्योरे मेरे पूर्णतम ज्ञान और विश्वास के अनुसार सत्य हैं।

(ह.) जितेन्द्र कुमार त्रिपाठी
प्रकाशक (अखिल भारतीय संस्कृत–परिषद्,
लखनऊ की ओर से)

ISSN : 2278-3741

पञ्ची. सङ्ख्या आर. एन. २६२३२/७७

अङ्काः १ – ४

वर्षः ४१